अथ सस्वर हिन्दीभाषाविधानसहिता

शुक्लयजुर्वेदीयविवाह-पद्धतिः ।

विवाहसामग्री, विवाहानुक्रमणी, तिलकविधि, मण्डप-स्थापनपूजनविधिः, तैल-हरिद्रालेपनविधि, द्वारपूजाविधि, शाखोच्चार, चतुर्थीकर्म, और कालिदासोक्तमंगलाष्टक-गोत्र-प्रवर आदि विविध विषय दिये गये हैं।

लेखक तथा सम्पादक—पं० श्रीकाशीनाथ शर्मा गौड़, त्रिलोचनघाट-वाराणसी ।

प्रकाशक—आदित्य प्रकाशन, भैरोनाथ-वाराणसी-१

प्राप्तिस्थान—श्रीराजराजेश्वरी पुस्तकालय-भैरोनाथ-वाराणसी ।

मूल्य ४)००

अथ सस्वर हिन्दीभाषाविधानसहिता

शुक्लयजुर्वेदीय-विवाह-पद्धतिः ।

विवाहसामग्री, विवाहानुक्रमणी, तिलकविधि, मण्डप-स्थापनपूजनविधिः, तैल-हरिद्रालेपनविधि, द्वारपूजाविधि, शाखोच्चार, चतुर्थीकर्म, और कालिदासोक्तमंगलाष्टक-गोत्र-प्रवर आदि विविध विषय दिये गये हैं।

लेखक तथा सम्पादक—पं० श्रीकाशीनाथ शर्मा गौड़, त्रिलोचनघाट—वाराणसी ।

प्रकाशक—आदित्य प्रकाशन, भैरोनाथ-वाराणसी—१

प्राप्तिस्थान—श्रीराजराजेश्वरी पुस्तकालय-भैरोनाथ-वाराणसी ।

मूल्य ४)००

प्रकाशक—

आदित्य प्रकाशन,

भैरोनाथ-वाराणसी।

मूल्य ४)००

मुद्रक:—

नर्मदा प्रेस

ए० २।७६, त्रिलोचनघाट,

वाराणसी।

॥ श्रीः ॥

विवाह-सामग्री

रोली
मौली
धूपबत्ती
गुड़
कपूर
रुई-घी
नैवेद्य
ऋतुफल
पान-सुपारी
अक्षत
गङ्गाजल
यज्ञोपवीत
अबीर-बुक्का
पीसी हलदी
पुष्पमाला

पञ्चगव्य-पञ्चामृत
पत्तल
सकोरा
पुरवा
नारियल सजल और शुष्क
कुशा-दूर्वा
पलास समिधा
आम की लकड़ी
गोहरा (कण्डा)
सर्वोषधी
सप्तधान्य
पञ्चपल्लव
पीढा
बन्दनवार
तुलसी

पीली सरसों
छायापात्र
काँसे की कटोरी
आटा
अँगूठी
वरण सामग्री ४
सप्तमृत्तिका
कलश (ढकनेदार)
आज्यस्थाली
चरुस्थाली
पूर्णपात्र
पाद्यपात्र
आचमनी
मधुपर्कपात्र
मधुपर्क

विष्टर
व्यजन (पंखा)
आसन
श्वेतवस्त्र
शमीपत्र
धान का लावा
सूप (छाज)
शिला (लोढ़ा)
सिन्दूर
केले के खम्भे
शंख-चावल
बालू या मिट्टी
वस्त्रचतुष्टय
अन्तः पटवस्त्र
दक्षिणादि

अथ विवाहानुक्रमणी ।

विवाह कर्म में जितनी क्रिया करनी होती है उनका क्रम पूर्वक वर्णन लिखते है--

आदौ विघ्नेशमभ्यर्च्य स्वस्तिपुण्याहवाचनम् । निर्माय मण्डपं पश्चान्मातृः षोडश पूजयेत् ॥ सम्पूज्य घृतजां देवीमाभ्युष्यं मनुमाजपेत् । ततो वृद्धिहितं श्राद्धं विष्टरग्रहणं ततः ॥ पाद्यांदानात्परं भूयो विष्टरग्रहणं भवेत् । आदायार्घ्यं तथाऽऽचम्य मधुपर्ककियां चरेत् ॥ पुनराचमनं कुर्यात् इन्द्रियस्पर्शनं ततः । गोदानं वरपूजा च पञ्चभूसंस्कृतिः क्रमात् ॥ ततो वह्नि समास्थाप्य परिधानं सुवाससः । परस्परं समञ्जेतमिति मन्त्रक्रिया ततः ॥ ग्रन्थिबन्धस्ततः पित्रोस्ततः कङ्कणबन्धनम् । हस्तलेपनमाचर्य शाखोच्चारं समाचरेत् ॥ ततो यौतकदानं स्याद्वित्तशाठ्यविवर्जितम् । तृणपूल्युपवशात्तु परं स्याद्ग्रन्थिबन्धनम् ॥ ब्रह्मादेर्वरणात् पश्चादाचरेत्कुशकण्डिकाम् । परमाधारहवनादाज्यभागाहुतिर्भवेत् ॥ महाव्याहृतितः सर्वप्रायश्चित्ताहुतिः परम् । राष्ट्रभृद्धवनं कृत्वा जयाहोमं समाचरेत् ॥ अभ्यातानाहुतेः पश्चादग्निरैत्विति संहुतिः । वरवध्वोस्तथा वह्नेर्मध्ये स्यात् पटधारणम् ॥ आहुतिं मृत्यवे दत्त्वा लाजाहोमं चरेत्त्रिधा । सांगुष्ठहस्तग्रहणमश्मारोहणमेव च ॥ गाथागानं क्रमात् कृत्वा परिक्रान्तिचतुष्टयम् । भगाय लाजाहोमः स्यात् प्राजापत्याहुतिः क्रमात् ॥ ततः सप्तपदीं कृत्वा चतुर्युगमुदाहरेत् । अभिषिच्य वधूं वामे भागे समुपवेशयेत् ॥ प्रतिज्ञा वरध्वोश्च दद्यात्सिन्दूरमुत्तमम् । ततः कौतुकगेहे स्यात्कौतुकेनोपवेशनम् । स्विष्टकृद्दक्षिणा कौशकण्डिकायाः समापनम् । ध्रुवेक्षा त्रिप्रभुक्तिश्च भूयस्याशीर्विसर्जनम् ॥ चतुर्थीकर्म इत्येष विवाहानुक्रमो मतः ॥ इति ॥

अथ वरवरणम् (तिलकविधिः)।

वरच्छा का पूजज प्रकार लिखते हैं—

कन्याभ्राता पिता वा स्वजनैः सह वरगृहे गत्वा प्रत्यङ्मुखमुपविश्य वरं प्राङ्मुखमुपवेशयेत् । ततः कन्याभ्राता (पिता) वरश्च आचम्य प्राणानायम्य, "ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥" इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य ॥ हस्ते जलाक्षतपुष्पाणि गृहीत्वा "ॐ आनो भद्राः" इत्यादि वैदिकमङ्गलमन्त्रान् 'सुमुखश्चैकदन्तश्च' इत्यादि पौराणिकमंगलश्लोकांश्च पठित्वा गौरीगणेशस्मरणपूर्वकं संकल्पं कुर्यात् । तद्यथा—

कन्या का भाई वा पिता अपने स्वजनों भाई बन्धुओं सहित वर के गृह जाकर मण्डप में पश्चिमाभिमुख बैठे—सुन्दर आसन पर वर को पूर्व की ओर मुख कर बैठावे । कन्या पक्ष के, पिता व भाई—और वर आचमन प्राणायाम करें । अपवित्रः मन्त्र से अपने ऊपर तथा पूजन की सामग्रियों पर जल के छींटें देकर शुद्धि कर लें । फिर हाथ में जल-अक्षत-फूल ले आनोभद्रादि वैदिक मन्त्रों और सुमुखश्चैक० इत्यादि मंगल मन्त्रों से गणपति स्मरण करे—और संकल्प करें ।

देशकालौ सङ्कीर्त्य "अमुकगोत्रः अमुकशर्माऽहं मम अमुकगोत्रायाः अमुकनाम्न्याः कन्यायाः(भगिन्याः) करिष्यमाण विवाहकर्मणि एभिर्वरणद्रव्यैः वरपूजनपूर्वकं वरवरणं करिष्ये"। वरश्च—देशकालौ सङ्कीर्त्य "अमुकगोत्रः अमुकशर्माऽहं करिष्यमाणविवाहकर्मणि वरवृत्ति-ग्रहणं (फल-वस्त्रादिग्रहणं) करिष्ये"। तदङ्गत्वेन कलशस्थापनविधिना कलशस्थापनं, वरुणपूजनं, नवग्रहादीनां च स्थापनं पूजनं च करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये।" ततः कन्याभ्राता (पिता) वरश्च गणपत्यादिदेवानां षोडशोपचारैः सम्पूजयेत्। पश्चात् कन्याभ्राता वरस्य पादप्रक्षालनं कुर्यात्। तद्यथा—

कन्या पक्ष के जलाक्षत-पूंगीफल द्रव्यादि लेकर संकल्प कर-कलश स्थापन का संकल्प करे—विधि सहित कलश स्थापन, वरुणपूजन नवग्रह का स्थापन कर-गणेशादि का विधिवत् पूजन कर-कन्यापक्ष-वर का पाद प्रक्षालन वगैरह करें।

"ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः।" इति मन्त्रेण पादप्रक्षालनम्। ॐ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परि तस्थुषः। रोचन्ते रोचना दिवि। युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा। इति मन्त्रेण गन्धम्। 'ओं अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत। अस्तोषत स्वभानवो विप्रा

नविष्ठया मती योजान्विन्द्रते हरी। इति मन्त्रेण अक्षतान्। "ॐ या ऽआहरञ्जमदग्निः श्रद्धायै कामायेन्द्रियाय। सा अहं प्रतिगृह्णामि यशसा च भगेन च।" इति मन्त्रेण पुष्पमालाग्रहणम्। "ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु। तेन संग्रथिताः सुमनस आबध्नामि यशो मयि॥ इति मन्त्रेण पुष्पमालापरिधानम्। इति वरं सम्पूज्य कन्याभ्राता (पिता) वा स्वतहस्ते वर-वरणद्रव्याण्यादाय संकल्पं कुर्यात्। तद्यथा—

कन्यापक्ष वर पूजन करे बिराजो मंत्र से पादप्रक्षालन, युंजन्ति मंत्र से गन्ध लगावे, अक्षन्न मी मदन्त से अक्षत लगावें याऽआहर मन्त्र से माला ग्रहण करे और यद्यशो० मंत्र से गले में पहिरा दे। इसके बाद वर के सामान के निमित्त संकल्प करे—

देशकालौ सङ्कीर्त्य "अमुकगोत्रः अमुकशर्माहं अमुकनाम्न्या भगिन्याः (कन्याया वा) करिष्यमाण उद्वाहकर्मणि एभिर्वरणद्रव्यैः अक्षत-पुष्प-चन्दन-ताम्बूल-नारिकेलफलं हरिद्रा-दूर्वा-मांगलिक सूत्र-वस्त्र-भाजन-वासोभिः अमुकगोत्रं अमुकशर्माणं वरं कन्यादानार्थं—

(भगिनिदानार्थं) त्वामहं वृणे"। वरः—"वृतोऽस्मि" इति पठेत्। पश्चात् कन्याभ्राता (पिता वा) वरश्च भूयसीदक्षिणासंकल्पं कुर्यात्। अनन्तरं आचार्याय दक्षिणां दद्यात् ततः कन्याभ्राता (पिता वा) वरश्च हस्ते अक्षतान्-गृहीत्वा "प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः। यस्यस्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां यातु सद्योवन्दे तमच्युतम्।" इत्यादिना विसर्जनं कुर्यात्। इति वरवरण—(तिलकविधिः) विधिः।

कन्या पक्ष पिता या भ्राता वरण संकल्प त्वामहं वृणे तक पढ़कर वस्तुएँ दे दें। वर भी वृतोऽस्मि कहकर वरण द्रव्य ग्रहण कर लें। भूयसी दक्षिणा का संकल्प दोनों पक्ष करे। आचार्यादिको दक्षिणा दें। अक्षत पुष्प लेकर सब देवों का विसर्जन करें। इति तिलकविधिः॥

अथ मण्डपस्थापनंपूजनं च

मण्डपस्थापन तथा पूजन प्रकार लिखते हैं—

तत आग्नेया दिषु चतुर्षु मण्डपकोणेषु क्रमेण स्तम्भारोपणम् मध्यमेकस्तम्भंरोपयेत्।

अग्निकोण से प्रारम्भ कर चारों कोणों में क्रम से स्तम्भ गाड़े इसके बाद चारों खम्भों के मध्य में–हलश (हरिश) केले का खम्भा इत्यादि देशाचार व कुलाचार के अनुसार गाड़ दे।

ओं देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। इत्यभिमादत्ते ॥ १ ॥ ॐ इद मह छं रक्षसां ग्रीवा अपि कृन्तामि। इत्यवटो परिरेखां कुर्यात् ॥ २ ॥ ॐ मावो रिषत्खनिता यस्मै चाऽहं खनामिः द्विपाच्चतुष्पादस्माकं छं सर्व्वं मस्त्वनातुरम्। इति खनंति ॥ ३ ॥ ॐ सिञ्चति परिषिञ्चन्त्युत्सिञ्चति पुनन्ति च। सुराये ब्रम्बै मदे किंत्वो वदन्ति किंत्व?। इति तस्मिन्नवटे अप सिञ्चति ॥ ४ ॥ ॐ यवोसि यवया स्मद्द्वेषो यवयारातीः?। इत्यवटे यवान् वपति ॥ ५ ॥

इसप्रकार मण्डप का—"देवस्यत्वेति" मन्त्र से कुदाली या खोदने की वस्तु लेवे। 'इदमह' इससे रेखा करे ॥ 'भावोरिषत' मन्त्र से–खोदे ॥ 'सिंचति' मन्त्र से जल सींचे ॥ 'यवोसि' मन्त्र से गड्ढों में जौ बोये ॥

दर्भं सिद्धार्थकान तूष्णीमा वपति । ॐ काण्डा त्काण्डात्प्ररोहन्ती परुषः परुष्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च । इति वटे दुर्वाकरान् ॥६॥ ॐ दुधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभिनो मुखा करत्प्रणऽआयूꣳषि तारिषत् । इति वटे दधि क्षिपत् ॥ ७ ॥ ॐ याः फलिनीर्य्या अफलाऽअपुष्पायाश्च पुष्पिणीः । बृहस्पतिं प्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ इति वटे पूगीफलं क्षिपेत् ॥ ८ ॥ ॐ हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ इति वटे हिरण्यं वपति । ॐ उच्छ्रयस्व वनस्पति ऊर्ध्वो मा पाह्यꣳ हꣳसऽआस्य यज्ञस्योदृचः ॥ इति मन्त्रेण स्तम्भारोपणम् ॥ १० ॥ ॐ ऊर्ध्व ऊ षुण ऊतये तिष्ठा देवो न सविता ॥ ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भि र्विह्वयामहे ॥ इति वटे स्तम्भारोपणम् ॥ ११ ॥ ॐ स्थिरो भवविड्वङ्गऽआशुर्भव वाज्यर्वन् ॥ पृथुर्भव सुखदुस्त्वमग्नेः पुरीष वाहणः । इति स्थिरीकरणम् ।

कुशा पीली सरसों मौनहो छोड़े। 'कांडात्कांडा' मन्त्र से दूर्वा छोड़े। 'दधिक्रा' मन्त्र से दही छोड़े। याः फलि० मन्त्र से गढ़े मे सुपारी, हिरण्यगर्भ मन्त्र से सुवर्ण ताम्रखण्ड, उच्छ्रयस्व मंत्र से स्तम्भ खड़ा कर 'ऊर्ध्व०' मंत्र से खम्भा गाड़े॥ 'स्थिरोभव' मन्त्र से खम्भा ठपकर दे जिससे लुढ़के नहीं, झुके नहीं॥

तस्मिन् स्तभे आग्नेयादि क्रमेण नन्दिन्यादि मण्डपमातृः पूजयेत्।

तद्यथा—ॐ नन्दिन्यै नमः॥ नन्दिनीमावाहयामि, स्थापयामि, पूजयामि॥ १॥

ॐ नलिन्यै नमः नलिनीमावाहयामि, स्थापयामि, पूजयामि॥ २॥

ॐ मैत्रायै नमः मैत्रामावाहयामि, स्थापयामि, पूजयामि॥ ३॥

ॐ उमायै नमः उमामावाहयामि स्थापयामि, पूजयामि॥ ४॥

ओं पशुवर्द्धिन्यै नमः पशुवर्द्धिनीमावाहयामि, स्थापयामि पूजयामि॥ ५॥

उन्हीं स्तम्भों में अग्निकोण से प्रारम्भ कर नन्दिन्यादि पांचों मातृकाओं का आवाहन स्थापन पूजन नाम मंत्रों से करे॥

प्राणप्रतिष्ठा—ओं मनोजूतिर्ज्जुषता माज्ज्यंस्य बृहस्पतिं य्र्ज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु । विश्वेदेवासऽइहमादयन्तामों ३ म्प्रतिष्ठ ॥ नन्दिन्यादि पञ्चमण्डपमातरः सुप्रतिष्ठिता वरदाः भवन्तु ॥ सर्वेमातरः एकतन्त्रेण षोडशोपचारैः या लब्धोपचारैः सम्पूज्य ॥ अनयापूजया नन्दिन्यादि पंचमण्डपमातरः प्रीयन्ताम् । कृतैतत् मण्डपपूजन कर्मणः सांगता सिद्धयर्थं दशसंख्यकान् ब्राह्मणान् भोजयिष्ये ।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः । यस्य स्मृता च नामोक्त्या तपो यज्ञ क्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् । (इति मण्डपपूजनम्)

मनोजूति से प्राणप्रतिष्ठा करे । और एकतन्त्र से ही पूजन करे । दश ब्राह्मणों का भोजन कराने का संकल्प करे । प्रमादात्, यस्य स्मृत्या मंत्र से क्षमा प्रार्थना कर ले ॥

अथ तैल-हरिद्रालेपनविधिः ।

तैल हरिद्रालेपन विधि लिखते हैं—

आचम्य प्राणानायम्य "ओं अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपिवा ॥ यः स्मरेत्पुंडरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥" इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य, हस्ते जलाक्षतपुष्पाणि गृहीत्वा "ओं आनो भद्राः" इत्यादि वैदिकमन्त्रान् "सुमुखश्चैकदन्तश्च" इत्यादि पौराणिकमन्त्रांश्च पठित्वा सङ्कल्पं कुर्यात् ।

वरस्य सङ्कल्पः—"देशकालौ सङ्कीर्त्य–अमुकगोत्रः अमुकशर्माऽहं मम विवाहाङ्गभूतं तैल-हरिद्रालेपनं करिष्ये ।"

कन्याया-संकल्पः—अमुकगोत्रा अमुकनाम्नी कन्याऽहं मम विवाहांगभूतं तैल हिरद्रालेपनं करिष्ये ।

तदङ्गत्वेन कलशस्थापनं पूजनं च करिष्ये, तत्रादौ निर्विघ्नतासिद्धयर्थं गणेशाम्बिकयोः पूजनं च करिष्ये । इति सङ्कल्प्य गणपत्यादिदेवानां (षोडशोपचारैः) यथोपचारैः पूजनं

कुर्यात्। ततः कलशोपरि दीपं प्रज्वलय्य "ओं काण्डात्काण्डात्" इत्यनेन हरिद्रालेपनम्। "ओं युञ्जन्ति" इत्यनेन मस्तके कुङ्कुमानुलेपनम्। "ओं अक्षन्नमीमदन्त" इत्यनेन मस्तके अक्षतधारणम्। "ओं यदाबध्नन् दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः॥ तन्मऽआबध्नामि॥ शत शारदाया युष्मान् जरदष्टिर्यथासम॥ (इति कङ्कण बन्धनम्।) इत्यनेन वरदक्षिणहस्ते पीतवस्त्रराजिकाकपर्दिकालोहमुद्रिकासमन्वितं कङ्कणं बध्नीयात्। (कन्यायास्तु वाहमस्ते कङ्कणं बध्नीयात्)। ततः आचार्याय दक्षिणां दद्यात्। ब्राह्मणान् भूयसीं दक्षिणां दद्यात्। "ओं प्रमादात्" इति बिसर्जनम्। ततो ब्राह्मणभोजनम्।

इति तैल-हरिद्रालेपनविधिः।

काण्डात मंत्र से हरिद्रालेपन-युंजन्ति मंत्र से मस्तक में रोली अक्षन्नमी० मंत्र से अक्षत लगावे। यदाबध्नन दाक्षा० मन्त्र से देशकाल कुल के अनुसार कङ्कण या मौली बाधे। तदनन्तर कृतैतत् मन्त्र से आचार्य दक्षिणा संकल्प—भूयसी दक्षिणा का संकल्प करना चाहिये। दस ब्राह्मणभोजन का संकल्प कर प्रमादात से क्षमा याचना करे॥ इति हरिद्रालेपन विधिः॥

अथ द्वारपूजाविधिः

द्वारपूजा प्रकार लिखते हैं–

दाता (कन्यापिता) वरश्च आचम्य प्राणानायम्य,—ॐ अपवित्रः पवित्रो वा' इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य, हस्ते अक्षतपुष्पाणि गृहीत्वा 'आनो भद्रादीन्' मङ्गलमन्त्रान् पठेत् । ततो दाता हस्ते जलाक्षतद्रव्यंचादाय सङ्कल्पं कुर्यात् । तद्यथा—देशकालौ सङ्कीर्त्य "मम अमुकगोत्राया अमुकनाम्न्याः कन्यायाः उद्वाहाङ्गभूतं द्वारदेशमागताय वराय वरार्चनं करिष्ये, तदङ्गत्वेन कलशस्थापनादिकञ्च करिष्ये ।" तत्रादौ निर्विघ्नतासिद्धयर्थं गणेशाम्बिकयोः पूजनं कृत्वा वरपूजनञ्च कुर्यात् । "ॐ विराजो दोहोऽहि" इति मन्त्रेण पादप्रक्षालनम् । "ॐ गन्धद्वारां" इति मन्त्रेण गन्धम् । "ॐ अक्षन्नमीमदन्त' इत्यनेन अक्षतान् । 'ॐ याऽ आहार०' इत्यनेन पुष्पमालाम् । "ॐ हिरण्यगर्भः सम०" इत्यनेन दक्षिणाद्रव्यम् । "कृतैतत् वरपूजनकर्मणः साङ्गतासिद्धयर्थं तत्सम्पूर्णफलप्राप्त्यर्थं मनसोदिष्टां दक्षिणां अमुकगोत्राय अमुकशर्मणे वराय तुभ्यमहं सम्प्रददे ।" 'कृतैतत् वरपूजनकर्मणः सांगतासिद्धयर्थं तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ।" ततः "यान्तु देवगणाः सर्वे" इति देवान् विसृज्य "ॐ प्रमादात्कुर्वतां कर्म" इत्यादि मन्त्रेण देवप्रार्थना विधेया ॥ इति द्वारपूजा ॥

॥ श्रीगणेशाय नमः ॥

अथ माध्यन्दिनशाखीया विवाहपद्धतिः ।

तत्रादौ कन्यापक्षे पूर्वाङ्गविधिः

तत्र वैवाहिकाद्दिनात्पूर्वं "न पूर्वमिदमाचरेत्त्रिनवषण्मिते वासरे" इति निषेधात् नवम-षष्ठ-तृतीयदिवसरहिते विवाहोक्तनक्षत्रे चन्द्राद्यानुकूल्ये पित्रादिः कन्यायाः पुत्रस्य च वैवाहिकं सर्वारम्भं कुर्यात् ।

तत्र विवाहदिनात्पूर्वदिने तस्मिन्नेव दिने वा सपत्नीकः कर्त्ता कन्यापित्रादिः कृतनित्यक्रियः कृतमाङ्गलिक स्नानः कृततिलकः स्वलङ्कृतो बद्धशिखः कृतवलिवैश्वदेवः प्रागग्रे आसने प्राङ्मुख उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेश्य पत्नीदक्षिणतः कन्यां चोपवेश्य रक्षादीपं प्रज्वलय्य पवित्रपाणिराचम्य प्राणानायम्य शान्तिपाठं पठेत् । तद्यथा—

स्वस्तिवाचन शान्तिपाठ लिखते हैं सर्वकर्म के आरम्भ में इन मंत्रों का स्मरण आवश्यक है—

हरिः ॐ आ नो भद्राः क्रतवो यन्तुविश्वतोऽदब्धासोऽअपरीतासऽ उद्भिदः॥ देवा नो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥ देवानाँ भद्रा सुमतिर्ऋजूयता

न्देवानां ँ रातिरभि नो निवर्त्तताम् ॥ देवानां ँ सख्यमुपसेदिमाव्वयन्देवा नऽ आयु ष्प्रतिरन्तु जीवसे॥२॥तान्पूर्व्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षंमस्रिधम्॥ अर्य्यमणं व्वरुणं ँ सोममश्विना सरस्वती न सुभगा मयस्करत् ॥३॥ तन्नो व्वातो मयोभु व्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ॥ तद्ग्रावाणः सोमसुतो मयोभुव स्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् । पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्ति नऽ इन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो व्विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो व्विश्वे नो देवाऽ अवसाऽऽगमन्निह ॥ ७ ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाऽक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८ ॥ शतमिन्नु शरदोऽन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मा नो मद्धचा रीरिषताऽऽयुर्ग्गन्तोः ॥ ६ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः । व्विश्वे देवाऽ अदितिः पञ्च जनाऽ अदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरोषधयः शान्तिः ॥ व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्बह्म शान्तिः सर्व्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ११ ॥ यतो यतः समीहसे ततो नोऽअभयं कुरु ॥ शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ १२ ॥ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम ॥ आऽहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ १३ ॥ अम्बेऽ अम्बिकेऽम्बालिके न मा नयति कश्चन ॥ ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ १४ ॥

ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ उमामहेश्वराभ्यां नमः । ॐ वाणीहिरण्यगर्भाभ्यां नमः । ॐ शचीपुरन्दराभ्यां नमः । ॐ मातृपितृचरणकमलेभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो

नमः । ॐ स्थानदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः । इति प्रणम्य—गणेशगौरी प्रार्थना—

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥३॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥४॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥६॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥७॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥८॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥९॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१०॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥११॥ स्मृते सकलकल्याणं भाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥१२॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१३॥ विश्वेशं माधवं ढुण्ढि दण्डपाणिं च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥१४॥ इति श्लोकान् पठेत् ।

कन्या पक्ष में संस्कार न करने पर प्रायश्चित्त प्रकार लिखते हैं—

ततः कन्याया गर्भाधानादिसंस्काराणामकरणनिमित्तं प्रायश्चित्तं कुर्यात्। तद्यथा—कन्या पित्रादिहस्ते कुशादीन्यादाय देशकालौ संकीर्त्य "मम अस्याः कन्यया गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमणा ऽन्नप्राशन-चूडाकरणसंस्काराणामकरणजन्यप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रतिसंस्कारं पादकृच्छ्रं चूडाया अर्द्धकृच्छ्रं प्रायश्चित्तं तत्प्रत्याम्नायगोनिष्क्रयद्रव्यदानेन आचरिष्यामि" इति संकल्प्य नव-गोनिष्क्रयद्रव्यं गृहीत्वा, देशकालौ संकीर्त्य "मम अस्याः कन्याया गर्भाधानादिसंस्काराणामकरणजन्यप्रत्यवायपरिहारार्थमिदं नवगोनिष्क्रयद्रव्यं ब्राह्मणाय तुभ्यमहं सम्प्रददे" इति दद्यात्।

ततः प्रधानसङ्कल्पं कुर्यात्—देशकालौ संकीर्त्य "मम अस्याः कन्याया बीजगर्भसमुद्भवैनोनिबर्हणार्थं भर्त्रा सह धर्म्यप्रजोत्पादन—गृह्यपरिग्रह—धर्माचरणेष्वधिकारसिद्धिद्वारा च श्रीपरमेश्वरप्रीत्यर्थं ब्राह्मविवाहविधिना विवाहाख्यसंस्कारं करिष्ये" इति संकल्प्य "तदंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनमायुष्यमन्त्रजपं सांकल्पिकेन विधिना नान्दीश्राद्धं च करिष्ये" इति संकल्प्यं "तत्रादौ निर्विघ्नतासिद्धयर्थं-गणेशाम्बिकयोः पूजनं क करिष्ये" इति च संकल्प्य तानि कुर्यात्। सति सम्भवे "ग्रहानुकूल्यतासिद्धयर्थं ग्रहयागं करिष्ये" इति संकल्प्य ग्रहयागं च कुर्यात्।

वरपक्षे पूर्वाङ्गविधिः

वरपक्ष में पूजन प्रकार लिखते हैं—वर का पिता विवाह के दिन या उसके पूर्व दिन पूर्व मुख बैठ कर पत्नी सहित शान्तिपाठ गणेश आदि का पूजन करे।

वरपिता विवाहदिने तत्पूर्वदिने वा प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं तद्दक्षिणतः पुत्रं चोपवेश्य "आ नो भद्राः" इति शान्तिपाठं पठित्वा गणेशादीन् नमस्कृत्य 'सुमुखश्चैकदन्तश्च' इत्यादि पठेत्।

ततः प्रधानसंकल्पं कुर्यात्—देशकालौ संकीर्त्य "अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं ममास्य पुत्रस्य देवपितृऋणापाकरहेतुधर्म्यप्रजोत्पादनगृह्यपरिग्रहसिद्धिद्वारा श्रीपरमेश्वरप्रीतये विवाहाख्यं संस्कारं करिष्ये"। "तत्पूर्वाङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृपूजां वसोर्धारापूजनमायुष्यमन्त्रजपं नान्दीश्राद्धं च करिष्ये"। "तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये" इति संकल्प्य तानि कुर्यात्।

विवाह संस्कार करने के लिए संकल्पकर—स्वस्तिवाचन पुण्याहवाचन, मातृकापूजन वसोर्धारा पूजन, आयुष्य मंत्र जप नान्दी श्राद्ध करे।

सति संभवे 'ग्रहानुकूल्यतासिद्ध्यर्थं ग्रहयज्ञं च करिष्ये' इति संकल्प्य तदपि कुर्यात्।

प्रायश्चित के परिहार के लिये संकल्प करे।

अत्रैव वरः अनाश्रमस्थितिप्रयुक्तदोषपरिहारार्थं प्रायश्चित्तं कुर्यात्। तद्यथा--वरः--"देशकालौ सकीर्त्य अमुकगोत्रस्य अमुकशर्मणो मम समावर्तनदिनमारभ्य अद्यदिनं यावत् अनाश्रमस्थितिजन्यदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्राजापत्यकृच्छ्रप्रत्याम्नायभूतैकगोनिष्क्रयद्रव्यं ब्राह्मणाय सम्प्रददे" इति दद्यात्।

इदं पूर्वाङ्गानुष्ठानं देशान्तरे विवाहे तत्रैव गत्वा कार्यम्। ततो वरो भूषितबान्धवादियुतो वाद्यघोषादिपुरःसरं कन्यापितृगृहं गच्छेत्। कन्यापिता च तिलकमालादिभिः संपूज्य समुपवेशयेत्।

अब वर विवाह स्थल में प्रवेश करे कन्या दाता सपत्नीक उत्तरमुख बैठ कर गणपति का पूजन करे।

ततो वरं विवाहरथलं प्रवेश्य प्राङ्मुखमुपवेश्य स्वयं कन्यादाता सपत्नीक उदङ्मुख उपविश्य गणपत्यादीन् पूजयेत्।

अथ गणेशाम्बिकापूजनम्।

गणेशगौरी का पूजन प्रकार लिखते हैं--

ऊँ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधिनान्त्वा निधिपतिꣳ हवामहे व्वसो मम। आहमजानि गर्भधमात्वमजासि गर्भधम् ॥१॥ ऊँ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥२॥ 'ऊँ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि। ऊँ गौर्यै नमः गौरीमावा-

हयामि इति आवाह्य । पादयोः पाद्यं समर्पयामि । अर्घ्यं समर्पयामि । आचमनीयं समर्पयामि । स्नानं समर्पयामि । यज्ञोपवीतं समर्पयामि । गन्धं समर्पयामि । अक्षतान् समर्पयामि । पुष्पाणि समर्पयामि । धूपं समर्पयामि । दीपं दर्शयामि । नैवेद्यं निवेदयामि । ताम्बूलं समर्पयामि । दक्षिणां समर्पयामि । मंत्रपुष्पाञ्जलिं समर्पयामि । अनया पूजया गणेशाम्बिके प्रीयेताम् ।

अथ षोडशमातृका पूजनम्

ततः ॐ गणपतये नमः गणपतिमा० । ॐ गौर्यै नमः गौरीमा० । ॐ पद्मायै नमः पद्मामा० । ॐ शच्यै नमः शचीमा० । ॐ मेधायै नमः मेधामा० । ॐ सावित्र्यै नमः सावित्रीमा० । ॐ विजयायै नमः विजयामा० । ॐ जयायै नमः जयामा० । ॐ देवसेनायै नमः देवसेनामा० । ॐ स्वधायै नमः स्वधामा० । ॐ स्वाहायै नमः स्वाहामा० । ओं मातृभ्यो नमः मातृमा० । ओं लोकमातृभ्यो नमः लोकमातरमा० । ओं धृत्यै नमः धृतिमा० । ओं पुष्टयै नमः पुष्टिमा० । ओं तुष्टयै नमः तुष्टिमा० । ओं आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवतामा० । षोडशमातृः सम्पूजयेत् स्थापयेच्च ॥

सप्तघृतमातृकापूजनम्

सप्तघृतमातृका पूजन प्रकार लिखते हैं—

षोडशमातृणाम् उत्तरदिशि भित्तौपट्टेन वा कुंकुमेन सप्तविन्दुकरणम् ॥

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा ॥ कामधुक्षः ॥ इत्येतान सप्तविन्दून गुडेन एकीकरणम् ।

षोडशमातृका के उत्तरभाग में दीवाल पर रोली या सिन्दूर से ७ बिन्दु ऊपर से नीचे को लगावे १ली पंक्ति में १ बिन्दु उससे नीचे दूसरी पंक्ति में दो बिन्दु इसी प्रकार हर पंक्ति में उतनी ही बिन्दु लगाते हुए सात बिन्दु सात लाइनों में लगावे ।

प्रतिधारा मेकैकदेवतामावाहयेत् ॥ ॐ श्रियैनमः श्रियमावा० ॥ १ ॥ ॐ लक्ष्म्यैनमः लक्ष्मीमा० ॥ २ ॥ ॐ धृत्यै नमः धृतिमा० ॥ ३ ॥ ॐ मेधायै नमः । मेधामा० ॥ ४ ॥

ॐ स्वाहायै नमः ॥ स्वाहामा० ॥ ५ ॥ प्रज्ञायै नमः प्रज्ञामा० ॥ ६ ॥ ॐ सरस्वत्यै नमः सरस्वतीमा० ॥ ७ ॥

इत्यावाह्य—ॐ मनोजूतिरिति मंत्रेण प्रतिष्ठाप्य सम्पूज्य प्रार्थयेत्-यदङ्गत्वेन-भोदेव्यः पूजिता विधिमार्गतः। कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्। अनया पूजया श्रियादि सप्तघृतमातरः प्रीयन्ताम् ॥ ८ ॥

सातो धाराओं में श्रियै नमः इत्यादि मंत्रों से आवाहन करे मूनोजूतिः मंत्र से प्रतिष्ठाकरके यथोपचार पूजन करे। यदङ्गत्वेन मंत्र से पूजन करे।

अथ नवग्रहस्थापनं पूजनम् च।

नवग्रह का स्थापन व पूजन का प्रकार लिखते हैं—जिससे निम्न मंत्र पढ़ता हुवा पूजन करे—

तत्रादौ हस्तेऽक्षतपुष्पाण्यादाय। ऊँ आ कृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१॥ ऊँ भूर्भुवः स्वः सूर्य! इहागच्छ इह तिष्ठ सूर्याय नमः ॥१॥ इति सूर्य-

मावाहयेत् । ततः—ॐ इमन्देवाऽअसपत्नꣳ सुवद्ध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥२॥ ॐ भूर्भुवः स्वः चन्द्र ! इहागच्छ इह तिष्ठ । चन्द्रमसे नमः ॥२॥ इति चन्द्रमावाहयेत् । ॐ अग्निम्मूर्द्धा दिवः ककुत्पति÷ पृथिव्याऽ अयम् ॥ अपा रेताꣳसि जिन्वति ॥३॥ ॐ भूर्भुवः स्वः भौम ! इहागच्छ इह तिष्ठ० ॥ भौमाय नमः ॥३॥ ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्तꣳ सृजेथा मयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥४॥ ॐ भूर्भुवः स्वः बुध ! इहा० बुधाय नमः ॥४॥ ॐ बृहस्पतेऽअति यदर्य्योऽ अर्हाद्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥५॥ ॐ भूर्भुवः स्वः बृहस्पते ! इहा० ॥ बृहस्पतये नमः ॥५॥ ॐ अन्नात्परिस्रुतोरसꣳ ब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमं प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपान शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोऽमृतम्मधु ॥६॥ ॐ भूर्भुवः स्वः शुक्र ! इहा० ॥ शुक्राय नमः ॥६॥ ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये ॥ शꣳयोरभिस्रवन्तु नः ॥७॥ भूर्भुवः स्वः शने ! इहा० ॥ शनये नमः ॥ ७ ॥ ओं कया नश्चित्रऽ आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ८ ॥ भूर्भुवः स्वः राहो ! इहागच्छ० । राहवे नमः ॥ ८ ॥ ओं केतुं कृण्वन्नकेतवे पेशो मर्य्याऽ अपेशसे । समुषद्भिरजायथाः ॥ ९ ॥ ॐ भूर्भुवः स्वः केतो ! इहागच्छ इह तिष्ठ । केतवे नमः । एवं स्थापनं कृत्वा 'ॐ ब्रह्मादि नवग्रहेभ्यो नमः इति नाममन्त्रेण षोडशोपचारैः पूजयेत् ।

नवग्रह प्रार्थना--ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्र शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु । इति नवग्रहपूजनम् ।

अथ कलशस्थापनपूजनविधिः ।

तत ईशान्यामक्षतं कलशं स्थापयेत्--

ईशान्य दिशा में कलश स्थानपन प्रकार लिखते हैं--महीद्यौः से पृथ्वी का पूजन, आजिघ्र से कलश को रखे, वरुणस्यो से जल भरे, गन्धद्वारा से गन्ध छोड़े, या ओषधी से सर्वोषधी या हल्दी, काण्डात २ से दूर्वा, अश्वत्थेवो से पंचपल्लव डाले, स्योना० से मिट्टी डाले, याः फलिनी से पूगी फल, परिवाज से पञ्चरत्न, हिरण्यगर्भ से हिरण्य छोड़े, सुजातो से कलश में सूत्र लपेटे । पूर्णादर्वि से पूर्णपात्र रखे, श्रीश्चते से नारियल रखे, मनोजूति० से प्रतिष्ठा करे, तब गणेश का गणानान्वा से-तथा वरुण का तत्वायामि से पूजन करे । और सोलहों पचार से पूजन विधान करे । गंगादि नदियों का आवाहन सर्वेसमुद्रा से करे । कलशस्य० से कलश का अभिमंत्रण करे । देव-दानव से प्रार्थना करे । इति कलश पूजन विधिः ।

ओं म॒हीद्यौः पृ॑थि॒वीच॑नऽइम॑य॒ज्ञमि॑ मिक्षिताम्। पि॒पृ॒तान्नो॒भरी॑मभिः॑॥१॥ भूमिंपूजयेत्। ओं आजि॑घ्र क॒लशं॑ म॒ह्या त्वा॑ व्विश॒न्त्विन्द॑वः॥ पुनरू॒र्ज्जा नि व॑र्त्तस्व॒ सा न॑ः सहस्रं॑ धुक्ष्वो॒ रुधा॑रा॒ पयस्वती॒ पुनर्म्माऽऽवि॑शताद्र॒यिः॥ २॥ वरुणस्येत्युदकं निक्षिपेत्। ओं व्वरु॑णस्यो॒त्तम्भनमसि व्वरु॑णस्य स्कम्भ॒सर्ज॑नीस्थो॒व्वरुण॑स्यऽऋत॒सदन्य॑सि व्वरु॑णस्य॒ ऋत॒सद॑नमसि व्वरु॑णस्यऽ ऋत॒सद॑न॒ मासी॑द॥२॥ गन्धद्वारामिति गन्धम्। ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥३॥ ओं याऽ ओषधीरिति सर्वौषधीः। ओं या ऽओष॑धी॒ः पूर्व्वा॑ जाता॒ देवेभ्यस्त्रि॑युग॒म्पु॒रा॥ मनै॒ नु॒ बब्भ्रू॑णामह॒ꣳश॒तन्धामा॑नि सप्त॒ च॥ ४॥ ओं काण्डा॑त्काण्डात्प्र॒रोह॑न्ती॒ परु॑षः॒ परुष॒स्परि॑। ए॒वा नो॑ दूर्वे॒ प्रत॑नु स॒हस्रे॑ण श॒तेन॑ च। इति दूर्वाः प्रक्षिपेत्। ओं अश्व॒त्थे नि॒ वो॑षद॑नं प॒र्णे वो॑ व्वस॒तिष्कृ॒ता। गो॒भाज॒ऽ इत्किला॑सथ॒ यत्स॒नव॑थ पूरु॑षम्॥ इति पञ्च-

पल्लवान् प्रक्षिपेत्। ओं स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। इति सप्तमृदः—प्रक्षिपेत्। ॐ याः फलिनीर्याऽ अफलाऽ अपुष्पायाश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ हसः। इति पूगीफलं प्रक्षिपेत्। ॐ परि-वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे। इति पञ्चरत्नानि प्रक्षिपेत्। ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽ आसीत्। स दाधार पृथिवीन्द्यामुते मां कस्मै देवाय हविषा विधेम॥ इति हिरण्यं प्रक्षिपेत्। ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः। वासोऽ अग्ने विश्वरूपꣳ संव्ययस्व विभावसो॥ इति मन्त्रेण सूत्रेण कलशमुखमावेष्टय। ॐ पूर्णादर्विव परा पत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽ इषमूर्ज्जꣳ शतक्रतो। इति कलशोपरि पूर्णपात्रं निदध्यात्। 'ॐ श्रीश्च ते' इति श्रीफलं च कलशोपरि स्थापयेत्॥ ओं श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽ इषाण सर्व्वलोकं मऽ इषाण॥५॥

ततः—ओं मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु। विश्वे देवासऽइह मादयन्तामो३ प्रतिष्ठ। इति मन्त्रेण प्रतिष्ठाप्य तत्र गणेशं वरुणं च सम्पूजयेत्। ओं गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिं ꣳ हवामहे व्वसोमम॥ आऽहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम्॥ १॥ ओं तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशꣳस मा नऽ आयुः प्रमोषीः॥२॥ ओं भूर्भुवः स्वः गणेश! वरुण! इहागच्छ! इह तिष्ठ। इत्यावाह्य 'ओं गणेशवरुणाभ्यां नमः' इति षोडशोपचारैः गणेशवरुणौ तत्र कलशे पूजयेत्। ततो गङ्गाद्यावाहनम्। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु यजमानस्य दुरितक्षयकारकाः॥ १॥ ततः कलशाभिमन्त्रणम्।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रित॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृ गणाः स्मृताः कुक्षौ तु सागराः सप्त सप्तद्वीपा रसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥२॥ अङ्गैश्च सहिता सर्वे कलशन्तु समाश्रिताः॥३॥

ततः प्रार्थना—

देवदानसंवादं मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥१॥ त्वत्तः सर्वाणि तीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि तिष्ठन्ति। भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥२॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः॥ अदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥३॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥४॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥५॥ इति कलशस्थापनप्रयोगः॥

अथ आयुष्यमंत्रजपः

निम्नमंत्रों को आयुवृद्धि के किये पढ़े।

आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम्। इदꣳ हिरण्यं वर्चस्वं जैत्रायाविशतादु मामꣳ ॥१॥ ऊँ नतद्रक्षाꣳसि पिशाचास्तरन्ति देवानामोज ÷ प्रसवꣳ ह्येतत्॥ यो बिभर्ति दाक्षायणा हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु

कृणुते दीर्घमायु ÷ ॥२॥ ॐ यदाबध्नन् दाक्षायणा हिरण्य ꣳ शतानीकाय सुमनस्य मानाः। तन्म ऽआबध्नामि शतशारदाया युष्मान् जरदष्टिर्यथा सम् ॥ ३ ॥ इतिआयुष्यमन्त्रजपः।

अथ नान्दीश्राद्धप्रयोगविधिः

अब निम्न विधि से सांकल्पिक श्राद्ध करे। पत्तल पर पूर्व दक्षिण क्रम से सीधी कुशाओं को बिछा कर उसी पर संकल्प के साथ पूजा करे। इसमें चारों स्थानों पर—पादप्रक्षालन—पूजन-भोजन-निष्क्रयदान आदि का संकल्प करके करना चाहिये ।

सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावने जनं पादप्रक्षालनं वृद्धिः। मातृ-पितामही-प्रपितामह्याः नान्दीमुख्यः भूर्भुवः स्व इदं वः पाद्यं पादावने जने पाद प्रक्षालनं वृद्धिः। पितृ-पितामह-प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावने जनं पादप्रक्षालनं वृद्धिः।

द्वितीयगोत्राः—मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।

ततः आसनदानम्—सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः। मातृ पितामहि-प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इमे आसने वो नमोनमः। पितृ-पितामह-प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः।

द्वितीयगोत्राः—मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः।

ततोगन्धादि दानम्—सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः। मातृ-पितामहि-प्रपितामह्य नान्दीमुख्यः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः। पितृ-पितामह-प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।

द्वितीयगोत्रः—मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।

भोजन निष्क्रयदानम्—ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजन पर्य्याप्तम्—आमान्न निष्क्रयभूतं द्रव्यम् अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातृपितामहि प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजन पर्याप्तम् आमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यंतां वृद्धिः ॥ ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजन पर्याप्तम् आमान्ननिष्क्रयभूतं द्रव्यम् अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥

द्वितीयगोत्राः—मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तम् आमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यतांवृद्धिः ।

स—क्षीरयवमुदकदानम्—ॐ सत्यवसुसंज्ञकाः विश्वेदेवा नान्दीमुखाः प्रीयन्ताम्, मातृ-पितामहि—प्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॥ ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः प्रीयन्ताम् ॥

द्वितीयगोत्राः—ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् । चतुर्षुस्थानेषु ॐ शिवा आपः सन्तु इति जलम् ॐ सौमनस्यमस्तु, इति पुष्पम् । ॐ अक्षतं चाऽरिष्टं चास्तु इति अक्षतान् । ओं अघोराः पितरः सन्तु । इति पूर्वाग्रा जलधारां दद्यात् ।

कृताजलिं प्रार्थयेत्—ओं गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तुअन्नं च नो बहुभवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्मकञ्चन। एनाःसत्याः आशिषः सन्तु। इति यजमानः।

ब्राह्मणाः—सन्त्वेताः सत्या आशिषः इति॥

दक्षिणादानम्—सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः कृतैतन्नान्दी श्राद्धस्य फलप्रतिष्ठा सिद्धयर्थं द्राक्षामलक-यव-मूल निष्क्रयणीं दक्षिणां दातुमहमुत्सृजे। ॐ मातृ पितामहि-प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः कृतैतन्नान्दी श्राद्धस्य फलप्रतिष्ठा सिद्धचर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे। पतृ-द्वितीयगोत्राः—ॐ मातामहः प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाःभूर्भुवः स्वः कृतैतन्नान्दी श्राद्धस्य फलप्रतिष्ठासिद्धयर्थं द्राक्षामलक-यव-मूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।

ततो यवसिद्धार्थक फल दूर्वा दुग्ध जल कुशाग्र-चन्दन पुष्प सहितमर्घपात्रं गृहीत्वा—निम्नमंत्रसे यव पीली सरसो फल-दूब दूध-जल-कुशाग्र से चन्दन-पुष्प सहित चारों स्थानों पर अर्घ देवे॥

उपास्मै गायता नरः पवमानायेन्दवे। अभिदेवाँ२ इयक्षते। ॐ इडामग्ने पुरुदꣳ सꣳ सनिङ्गोः शश्वत्तम ꣳ हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मै॥ इति मंत्रेण स्थानेषु अर्घ्यं दद्यात्॥

ततो यजमानः—अनेन नान्दीश्राद्धं सम्पन्नम्॥ ब्राह्मणः—सुसम्पन्नम्॥

यजमान—ब्राह्मण से नान्दीश्राद्ध पूर्णता की याचना करे। ब्राह्मण सुसम्पन्न हुवा कहै। बाजे मंत्र से विसर्जन कर दे॥ पत्तल को मोड़ बांध मातृका के पास ही रख दे॥

ॐ वाजे बाजे वत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः॥ अस्य मध्वः पिवत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ आमा वाजस्य प्रसवो जगम्यादेमेद्यावा पृथिवी विश्वरूपे॥ आमा गन्तां पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात्॥ ॐ विश्वेदेवाः प्रीयन्ताम्॥ इति नान्दीश्राद्धम्॥

अथ ब्रह्मादिदेवतास्थापन-पूजनम्

ऊँ ब्रह्म॑ जज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्विसी॑मतः सुरुचो॑ व्वे॒न ऽआव॑रः ॥ स॒बुध्न्या॒ ऽउपमा अ॑स्य वि॒ष्ठाः सत॒श्च॒ योनि॒मस॑तश्च॒ व्विव॑ः ॥ ऊँ भूर्भुवः स्वः ब्रह्मन्निहागच्छ इह तिष्ठ ॥१॥ ऊँ व्विष्णो॑ र॒रा॒टम॑सि॒ विष्णोः॒ श्नप्त्रे॑ स्थो॒ व्विष्णोः॒ स्यूर॑सि॒ विष्णो॑र्ध्रु॒वो॑ऽसि । वै॒ष्ण॒वम॑सि॒ विष्ण॑वे॒ त्वा ॥ ऊँ भू॰ विष्णो॰ ! ॥२॥ ऊँ नम॑ः शम्भ॒वाय॑ च॒ मयो॑भ॒वाय॑ च॒ नमः॑ शङ्क॒राय॑ च॒ मय॑स्क॒राय॑ च॒ नम॑ः शि॒वाय॑ च ॥ शि॒वत॑राय च ॥ ऊँ भू॰ शिव! इहा॰ ॥ ३ ॥ ऊँ श्रीश्च॑ ते॒ल॒क्ष्मीश्च॒ पत्न्या॑वहो॒रात्रे॒ पा॒र्श्वे॑ नक्ष॒त्राणि॑ रू॒प म॒श्विनो॒ व्या॑त्ताम् । इ॒ष्ण॒न्नि॑षा॒णामु॒म्म॑ ऽइषाणा स॒र्व्व॒लो॒कम्म॑ ऽइषाण ॥ ॐ भूः लक्ष्मि इहा॰ ॥ ४ ॥ ओं पञ्च॑ न॒द्यः॑ सरस्व॒तीम॑पि॒ यन्ति॒ सस्रो॑तसः । सर॑स्व॒ती तु॑ पञ्च॒धा सो दे॒शेऽभ॑व॒त्सरि॑त् । ओं भू॰ सरस्वति ! इहा॰ ॥५॥ ओं न॒हि स्प॒श॒म॒वि॒न्न॒न्य॒म॒स्मा॒द्वै॒श्वा॒न॒रात्पुर॑ ऽए॒ता॒र॒म॒ग्नेः । ए॒मे॒न॒म॒व॒र्ध॒न्न॒मृ॒ता॒ ऽअ॒म॒र्त्य॑ व्वैश्वान॒रं क्षैत्र॑ जित्याय॒ दे॒वाः । ओं भू॰ क्षेत्रपाल !

इहा० ॥ ६ ॥ ओं त्र्यम्बकं य्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय माऽमृतात् । ओं भू० त्र्यम्बक ! इहा० ॥ ७ ॥ जयन्ती मङ्गला कालो भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते । ओं भू० कुलदेवि ! इहागच्छ इह तिष्ठ ॥ ८ ॥ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता व्विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता । ओं भू० सर्वा देवता इहागच्छत इह तिष्ठत ॥ ९ ॥ इत्यावाह्य 'ओं ब्रह्मादिदेवताभ्यो नमः' इति षोडशोपचारैः सम्पूजयेत् ॥

अथ दिग्रक्षणविधानम् ।

हाथ में पीली सरसों लेकर निम्न मंत्रों को पढ़कर रक्षा के निमित्त दसो दिशाओं में छिड़के ।

तत्रादौ हस्ते श्वेतसर्षपान् गृहीत्वा पूर्वादिदिग्रक्षां कुर्यात् । तत्र मन्त्राः—पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥१॥ वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेदीशाने

तु गदाधरः ॥२॥ ऊर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः । एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ॥३॥ शङ्खो रक्षेच्च यज्ञाग्रे पृष्ठे खड्गस्तथैव च । वामपार्श्वे गदा रक्षेद्दक्षिणं तु सुदर्शनः ॥४॥ ब्राह्मणं माधवो रक्षेदार्यं पातु गदाधरः । अच्युतोऽवतु ऋग्वेदंयजुर्वेदमधोक्षजः ॥५॥ कृष्णश्च सामगं रक्षेदथर्वाणं च माधवः । उपदेष्टा तु यो विप्रस्तं रुद्रोऽवतु सर्वदा ॥६॥ यजमानं सपत्नीकं कमलाक्षश्च रक्षतु । रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ॥७॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥८॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥ सर्वेषामविरोधेन रक्षाकर्म समारभे ॥९॥

अथ रक्षासूत्रविधानम् ।

अब पहले मंत्रों से देवताओं को रक्षा सूत्र दान करे और मंत्रों द्वारा ही तिलक करे ।

ततो देवताभ्यो रक्षासूत्रदानम् ॥ ततो ब्राह्मणानां हस्तेषु रक्षाबन्धनं कर्त्तव्यम् । ओं व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ १ ॥ ततस्तिलकं कुर्यात् ॥ ओं युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः ॥ रोचन्ते रोचना दिवि ॥२॥युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे॥ शोणा धृष्णू नृवाहसा ॥३॥

कन्या पक्ष यजमान वर के हाथों में उसी रक्षासूत्र से वर के हाथ में बंधन करे और स्वस्तिन मंत्र से तिलक करे॥

अथ यजमान-वरयोर्हस्तेकङ्कणबन्धनम्—तत्र मन्त्रः—ओं यदाबध्नन्दाक्षायणा हिरण्यꣳ० शतानीकाय सुमनस्य मानाः॥ तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथाऽसम्॥ १॥ ओं त्वँ ग्यविष्ट दाशुषो नृँः पाहि शृणुधी गिरः॥ रक्षा तोक मुतत्मना॥ २॥ येन वद्धो बली राजा दानवेन्द्रो महाबलः॥ तेन त्वामनुबध्नामि रक्षे मा चल मा चल॥ ३॥

ततस्तिलकं कुर्यात्॥ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिꣳस्वस्ति नो बृहस्पतिर्दधातु॥४॥ इति रक्षाविधानम्॥

अथ मधुपर्कविधिः।

कन्या का पिता सपत्नीक शुद्ध वस्त्र धारण कर विवाहमण्डप में उत्तर-पूर्व मुंह बैठ मधुपर्क पूजन कर वरको शुद्ध आसन दे और बैठाकर मधुपर्क विधि से पूजन करूँगा—कहे।

कन्यापिता सपत्नीकः स्नातः शुचिः शुक्लाम्बरधरः कृतनित्यक्रियोऽर्हणवेलायां विवाहमण्डपे उदङ्मुखः प्रत्यङ्मुखो वा उपविश्य "कन्यादानप्रतिग्रहार्थं गृहागतं स्नातकं वरं मधुपर्कणार्चयिष्ये" इति संकल्प्य—वरोपवेशनार्थं वारणदियाज्ञिककाष्ठमय लेख्यालङ्कृतमनुपभुक्तमतिभव्यं दर्भोस्तीर्णं चतुष्पादमासन तदन्यादृशं वा शुद्धमासनं दत्त्वा प्राङ्मुखमवस्थितं वरं प्रति—(साधु भवानास्तामिति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुश्छन्दो वरार्चने विनियोगः) ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्' इति यजमानः ।

वर कहे—उत्तर में—आप पूजन सम्पादन करिये—कन्यापक्ष द्वारा विष्टर ग्रहण करावे—वर ग्रहण करे ।

ततो वर—'ॐ अर्चय' इति वदेत् । यजमानपक्षाभिः कश्चिद् ब्राह्मणः—'ॐ विष्टरो विष्टरो विष्टरः' इति त्रिः श्रावयेत् । यजमानः 'विष्टरः प्रतिगृह्यताम्' इत्युक्त्वा वरस्य हस्ते उदगग्रं विष्टरं दद्यात् । वरश्च 'ॐ विष्टरं प्रतिगृह्णामि' इत्यभिधाय (व्वष्मोऽस्मीत्यथर्वण ऋषिरनुष्टुप्छन्दो विष्टरो देवता उपवेशने विनियोगः) "ॐ व्वष्मोऽस्मि समानानामुद्यतामिव सूर्य्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासति ॥"

कन्यापक्ष से पिता वर को पाद्य ग्रहण करने के लिए कहे, वर ग्रहण करे—वर का पाद प्रक्षालन करे—

इत्यनेन मन्त्रेण उत्थाय उदगग्रं विष्टरं आसने निधाय तदुपरि वरः प्राङ्मुख उपविशति । ततः पाद्यपात्रमादाय 'ॐ पाद्यं पाद्यं पाद्यम्' इत्यन्येनोक्ते 'पाद्यं प्रतिगृह्यताम्' इति दाता वदेत् । वरः—'पाद्यं प्रतिगृह्णामि' इत्यभिधाय

पाद्यपात्रं गृहीत्वा तत्पात्रं भूमौ निधायाञ्जलिना जलमादाय (विराजो दोहोसीति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः आपो देवता पादप्रक्षालने विनियोगः) "ओं विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ।" इति मन्त्रेण दक्षिणचरणं प्रक्षाल्य, अनेनैव क्रमेणाऽनेनैव मन्त्रेण वामं चरणं प्रक्षालयेत । अत्र चरणप्रक्षालने पत्नी वामतो भवेत् । (क्षत्रियादीनां प्रथमं वामं पादप्रक्षालनम्) । क्षत्रिय और वैश्य प्रथम बाँया तब दाँया पैर धोवे ।

पहले की ही तरह पुनः विष्टर ग्रहण करावे-वर लेकर पैर के नीचे दबा ले,

ततः पूर्ववद्विष्टरान्तरं गृहीत्वा "विष्टरो विष्टरो विष्टरः" इत्यनेन त्रिः श्रावितं "प्रतिगृह्यताम्" इति यजमानेनोक्ते वरः—'प्रतिगृह्णामि' इत्युक्त्वा प्रतिगृह्य, ओं ब्वष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाऽभिदासति" इति मन्त्रेण उदग्रं पादयोरधस्तान्निधायोपविशेत् । ततो दाता कुशगन्धदूर्वाक्षतफलपुष्पचन्दनयुतार्घपात्रं गृहीत्वा—"अर्घोऽर्घोऽर्घः" इत्यन्येनोक्ते "अर्घः प्रतिगृह्यताम्" इति वदेत् । 'अर्घं प्रतिगृह्णामि' इत्यभिधाय वरो यजमानहस्तादर्घं गृहीत्वा (आपः स्थ इति मन्त्रस्य सिन्धुद्वीप ऋषिरनुष्टुप्छन्दः आपो देवता अर्घाक्षतादिधारणे विनियोगः) 'ओं आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानि' ।

इति मन्त्रेण पाणिभ्यां प्रतिगृह्य, शिरः पर्यन्तमानीय शिरसाऽभिवन्द्य भूमौ ऐशान्यामर्घजलं निनयन् अभिमन्त्रयेत्—(समुद्रं व इत्यादिमन्त्रस्याथर्वण ऋषिर्बृहतीछंदो वरुणो देवताऽर्घजलप्रवाहणे विनियोगः) "ओं समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टाऽस्माकं वीरा मा पराऽसेचि मत्पयः" ।

कन्यादाता आचमनी वर को देवे वर दाता के हाथ से आचमनी 'आमागन्त्यशसा' से १ आचमन करे।

तत आचमनीयमादाय--'आचमनीयमाचमनीयमाचमनीयम्' इत्यनेनोक्ते "आचमनीयं प्रतिगृह्यताम्" इति दाता वदेत्। वरः—"आचमनीयं प्रतिगृह्णामि" इत्यभिधाय यजमानहस्तादाचमनीयं गृहीत्वा।

(आमागन्निति परमेष्ठी ऋषिर्बृहतीछन्द आपो देवता आचमने विनियोगः)।

"ॐ आमाऽगन्यशसा स ꣳ सृज वर्च्चसा। तं मा कुरु प्रियं प्रजानामधिपति पशूनामरिष्टिं तनूनाम्॥"

इत्यनेन सकृदाचमेत्। ततो द्विराचमनम्। इसी प्रकार दो आचमन और विना मन्त्र के ही करे।

काँसे की कटोरी में दही-मधु-घी, रखे दूसरी कटोरी से ढके—मधुपर्कको ३ बार उच्चारण कर-मधुपर्कः प्रति गृह्यताम् वर से दाता कहे मधुपर्कं प्रतिगृह्णामि कहकर वर दाता के हाथ में मित्रस्य मंत्र से देखे। देवस्य त्वा मंत्र से दोनों हाथ से लेकर बाएँ हाथ पर रख, नमः श्यावा मंत्र से अंगूठा और अनामिका अंगुली से जरा सा जमीन पर छिड़कने की क्रिया २ बार करे। और यन्मधु से मधुपर्क ३ बार प्राशन करे शेष मधुपर्क को अमक्षार स्थान कलश के पास ही रख दें और आचमन करे।

ततो यजमानः कांस्यपात्रस्थदधि–मधु–घृतानि कांस्यपात्रपिहितान्यादाय "मधुपर्को मधुपर्को मधुपर्कः"–इत्यन्येनोक्ते "मधुपर्कः प्रतिगृह्यताम्" इति दाता वदेत्। "ओं मधुपर्कं प्रतिगृह्णामि" इति वरो वदेत्। ततो यजमानकरस्थमेवोद्धाटितं मधुपर्कं (मित्रस्येति प्रजापतिर्ऋषिः पंक्तिश्छन्दो मित्रो देवता मधुपर्कदर्शने विनियोगः)। "ओं मित्रस्य त्वा चक्षुषा प्रतीक्षे" इति निरीक्ष्य (देवस्यत्वेति बृहस्पतिर्ऋर्विर्यजुश्छन्दः सविता देवता मधुपर्कग्रहणे विनियोगः)।

"ॐ देवस्य त्वा सवितुः—प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि।"

इत्यञ्जलिना वरो मधुपर्कं गृहीत्वा स्ववामहस्ते कृत्वा (नमःश्यावेति प्रजापतिर्ऋषिर्गायत्रीछन्दः सविता देवता मधुपर्कालोडने विनियोगः):

"ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्क्रन्तामि"।

इत्यनामिकया प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठेन प्रागुदग्वा भूमौ निधाय (यन्मधुन इत्यस्य कौत्सऋषिर्मधुपर्को देवता जगतीच्छन्दो मधुपर्कप्राशने विनियोगः)।

"ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि"।

इति मन्त्रेण अनामिकाङ्गुष्ठेनैव मधुपर्कं प्राशयेत् । एवं पुनर्वारद्वयं मन्त्रेण प्राश्नीयात् । उच्छिष्टस्यैव मन्त्र वत्प्राशनम् । ततो मधुपर्कशेषं पूर्वस्यां दिशि असञ्चरदेशे क्षिपेत् । ततो द्विराचम्य, वरः अङ्गानि उपस्पृशेत् । तद्यथा—

आचमन कर वर अपने अंगो का स्मर्श 'वाङम' से मुख, जलंस्पृष्ट्वा । नसोर्मे से नासिका, अक्ष्णोर्मे से दोनों नेत्र, कर्णयोर्मे से दाये हाथ से दोनों कान, बाह्वोर्मे से दोनो बाहु का, ऊर्वो से घुटनों का, अरिष्टानि से सभी अंगों का स्पर्श करे ।

(वागित्यादीनां प्रजापतिर्ऋषिर्यजूंषि छन्दांसि लिङ्गोक्ता देवता गात्रालम्भने वि०) "ओं वाङ्मऽ आस्ये अस्तु" इति कराग्रेण मुखं स्पृशति । जलं स्पृष्ट्वा । 'ओं नसोर्मे प्राणः अस्तु' इति दक्षिण-वामनासारन्ध्रे । 'ओं अक्ष्णोर्मे चक्षुः अस्तु' इति युगपत् चक्षुषी । 'ओं कर्णयोर्मे श्रोत्रम् अस्तु इति दक्षिणवामकर्णौ । "ओं बाह्वोर्मे बलम् अस्तु' इति बाहुमूले । 'ओं ऊर्वोर्मे ओजः अस्तु' इति युगपदूरू । 'ओं अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु' इति शिरःप्रभृतीनि पादान्तानि सर्वाणि गात्राणि उभाभ्यां कराभ्यां संस्पृश्य द्विराचमेत् ।

अथ गवालम्भनविधिः (गोदान)

कन्या पक्ष द्वारा (यजमान) पहले गौ की दान (गोदान) विधि लिखते हैं । यजमान कहे ।

ततो यजमानः खड्गप्रतिनिधिं कृशतरुणं गोनिष्क्रद्रव्यं आदाय—"गौर्गौर्गौः" इत्यन्येनाभिहिते यजमान

'आलभ्यताम्' इत्याह । वरः 'माऽऽलभ्यताम्" इत्युक्त्वा मन्त्रं पठेत् ।

[माता रुद्राणामिति मन्त्रस्य ब्रह्मा ऋषिस्त्रिष्टुप्छन्दः गौर्देवताऽभिमन्त्रणे विनियोगः]।

ॐ माता रुद्राणां दुहिता वसूनाँ स्वसाऽऽदित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट । मम चाऽमुष्य चामुकशर्मणो यजमानस्योभयोः पाप्मा हतः । इत्यन्तमुपांशु पठित्वा—"ॐ उत्सृजत तृणान्यत्तु" इत्युच्चैर्ब्रूयात् । ततः कुशपत्रमुत्सृजेत् । अत्राऽऽचाराद् गोदानं कुर्यात् ।

संकल्पः—देशकालौ संकीर्त्य अमुकगोत्र अमुकशर्माहं आत्मनः पुत्रिविवाहकर्मणि संगतासिद्धचर्थं मधुपर्कोपयोगिनी गोरुत्सर्गकर्मणः साद्गुण्यार्थमिदं गोनिष्क्रयद्रव्यं ब्राह्मणाय विष्णुरूपाय वरायतुभ्यमहं सम्प्रददे" इति दद्यात् ।

यजमान गौगौंगौं का उच्चारण करे । तब वर माता रुद्रणां से लेकर उत्सृज तक कहकर तृण का त्याग कर दे । कुशपत्र का त्याग करने के बाद गौदान संकल्प करें और उसकी दक्षिणा स्वरूप दे अथवा गाय का ही संकल्प करे

ततो वरानमत्या वरपक्षीयो ब्राह्मणो वेदिकायां तुषकेशशर्करादिरहितायां हस्तमात्रपरिमितायां चतुरस्रायां भूमौ पञ्चभूसंस्कारान् कुर्यात् । पंचभूसंस्कार—कुशैः परिसमुह्य तान् कुशानैशान्यां परित्यज्य । गोमयेदकेनोपलिप्य । साग्निः स्फ्याग्रेण निरग्निः स्रुवमूलेन वा प्रागग्रप्रादेशमात्रमुरत्तोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठेन मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रविहितं कांस्यपात्रस्थं योजकनामानं वह्निं (लौकिकं निर्मन्थ्यं वा) अग्निकोणादानीय (अग्निं दूतमित्यस्य विरूपाक्ष ऋषिर्गायत्री छन्दोऽग्निर्देवताऽग्निस्थापने विनियोगः) ।

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँऽ आ सादयादिह । इति मन्त्रेण वेदिमध्ये स्थापयेद् वरशाखया । तदुपरि तद्रक्षार्थं काष्ठं किञ्चिन्नियुज्य उपधमेच्च । ततः कौतुकागारात् मातुलादिः मण्डपे स्नाता कन्यामानीय पितुरङ्के पश्चिमाभिमुखीमुपवेशयेत् । मौड़ी-(सेहरा) बन्धनम् ।

चौकौर मिट्टी की १ हाथ की वेदी पर पंचभूसंस्कार करके अग्नि की स्थापना अग्निं दूतं मंत्र से कर दे । और अग्नि के लिए गोहरा आम की लकड़ी वगैरह रख दे और उसे प्रज्वलित कर दे । तब कौतुकागार से (कोहबर-देवस्थान) कन्या को बुलावे-कन्या पिता ४ वस्त्र दे २ कन्या के लिये २ वर के लिये मौड़ी बन्धन कन्या का कर दे । उसका पूजन भी कर ले तभी बांधे ।

कन्यापूजनम्

ततः कन्यापिता वराय वस्त्रचतुष्टयं प्रयच्छति । वरः प्रतिगृह्य तेषां मध्ये वस्त्रद्वयं कन्यायै परिधानार्थं ददाति वस्त्रद्वयं स्वयं परिधत्ते । तत्र मन्त्रपाठो वरस्यैव लिङ्गात् । (जरां गच्छेति मंत्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दस्तन्तवो देवता वस्त्रपरिधाने विनियोगः) ।

"ॐ जरां गच्छ परिधत्स्व वासो भवाऽऽकृष्टीनमभिशस्तिपावा । शतं च जीव शरदः सुवर्च्चा रयिञ्चपुत्राननु संव्ययस्वाऽऽयुष्मतीदं वरिधत्स्व व्वास;" ।

इति मन्त्रेण कन्या अधोवस्त्र परिधत्ते । अथोत्तरीयम्—(याऽअकृंतन् इति मंत्रस्य प्रजापतिर्ऋषिर्जगतीछंदो विधात्र्यो देवता वस्त्रपरिधापने विनियोग) ।

कन्या को वस्त्र उपवस्त्र धारण करावे-चद्दर ओढ़ावे ।

ॐ याऽअकृन्तन्नवयं याऽअतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः" इति ।

कन्या वस्त्र उपवस्त्र धारण करले—चादर ओढ़ले। वर स्वयं परिधास्यै मंत्र का उच्चारण करता हुआ स्वयं वस्त्र धारण करे और आचमन करे।

ततो वरः स्वयं वासः परिधत्ते—(परिधास्यै इति मन्त्रस्याऽथर्वण ऋषिस्त्रिष्टुप्छन्दस्तन्तयो देवता वांसः परिधाने विनियोगः।

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरूची रायस्पोषमभि संव्ययिष्ये" ॥ आचमनम् ॥

इति पठित्वा अधोवस्त्रं परिधाय उत्तरीयवस्त्रं धारयेत्। तत्र मन्त्रः—(यशसेति मन्त्रस्य प्रजापतिर्ऋषिर्जगती छन्दो विधाता देवता वासःपरिधाने विनियोगः)।

"ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यशो भगश्च मा विद्यशो मा प्रति पद्यताम्।" इति।

कहीं-कहीं पर यज्ञोपवीत धारण कराने के बाद ही वस्त्र देते हैं। (देशाचार भेदः) द्विजातीनां यज्ञोपवीत धारणम्—ओं यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः। इति यज्ञोपवीतधारणम्।

वर कन्या को दो बार आचमन करा दे। लोकाचारानुसार आमने-सामने बैठे वर-कन्या को पान दे—अथवा शास्त्रानुसार एक दूसरे को देख ले।

ततो वरस्य कन्यायाश्च द्विराचमनम्। ततः कन्यापिता 'परस्परं 'समञ्ज्यताम्' इति प्रेषितयोर्वधूवरयोः परस्परं सम्मुखीकरणम्। ततो वरः सम्मुखीभूय कन्यां पश्यन् मन्त्रं पठति—(समञ्जन्त्विति मन्त्रस्याथर्वण ऋषिरनुष्टुप्छन्दो विश्वेदेवा देवता मैत्रीकरणे विनियोगः)।

"ॐ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ। संमातरिश्वा सन्धाता समु देष्ट्री दधातु नौ" इति।

कन्यादातुः स्वपत्न्या सह ग्रन्थिबन्धनम्

कन्यादान करने वाले का ग्रन्थि बन्धन कर दे। जिसमें-हल्दी-सुपारी-दूब अक्षत दक्षिणा रखकर बाँधे तथा वर कन्या के हाथों में ऐपन लगावे—

ततः कन्याप्रदस्य स्वपत्न्या सह ग्रन्थिबन्धनम्। (हरिद्रया कन्यावरयोर्हस्तलेपनम्, कङ्कणबन्धनं कन्यावरयोः)। शाखोच्चारः।

अथ लग्नदानम् ।

विवाह लग्न की शुद्धि के लिए वर पक्ष से दक्षिणा सहित संकल्प कराके दान करे ।

"अमुकप्रवरोऽमुकगोत्रोऽमुकशर्माऽहम् अमुकशर्मणो वरस्य दशायामन्तर्दशायां गोचरे अष्टवर्गे वर्षफलेऽपि वा विवाहलग्नात् यत्र कुत्र स्थाने स्थितानां दुष्टानामादित्यादिनवग्रहाणां दुष्टफलनिरासपूर्वकं शुभानां शुभफलाधिक प्राप्तये आदित्यादिनवग्रहाणां प्रीतये च इदं सुवर्णं तन्निष्क्रयीभूतं द्रव्यं वा ब्राह्मणाय दास्ये" इति सङ्कल्प्य दद्यात् ।

कन्या पक्ष भी लग्न की शुद्धि के लिए संकल्प कर दान करे ।

एवं कन्याया अपि । तत्र—अस्याः कन्याया दशायामित्यादि विशेषः । कन्यादाता वरदत्तवस्त्राभरणादिरहितां स्वप्रदेयवस्त्राभरणाद्यलङ्कृतां कन्यां दद्यात् ।

कन्या माता-पिता-संकल्प करे—वर के हाथ के ऊपर रख जिसमें शंख पूर्वा-अक्षत-फल-पुष्प-तुलसी सुवर्ण-जल रहे—निम्न संकल्प पढ़े ।

कन्यादाता स्नात उपोषितः पवित्रपाणि रुदङ्मुख उपविश्य स्वदक्षिणतः पत्नीं, स्वांके प्रत्यङ्मुखीं कन्यां

कन्यादान करने के लिए संकल्प करे और गोत्रोच्चार का उच्चारण करें–इसमें, शंख-दूर्वा-अक्षत-फल–पुष्प चन्दन यव तुलसी सुवर्ण कुश जलादि लेकर करे।

शंखमादाय–पुनर्देशकालौ संकीर्त्य "मम अस्याः कन्याया अनेन वरेण धर्मप्रजया उभयोर्वंशयोर्वृद्ध्यर्थं मम समस्तपितृणां नरतिशयसानन्दब्रह्मलोकप्राप्त्यादिकन्यादानकल्पोक्तफलप्राप्तयेऽनेन वरेणास्यां कन्यायामुत्पादयिष्यमाण सन्तत्या दश पूर्वान् दश परान् मां च एकविंशतिपुरुषान् उद्धर्तुकामः श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये" इति सङ्कल्प्य, वरं सम्पूज्य, शंखस्थदूर्वाक्षतफलपुष्पचन्दनयवतुलसीपत्रहिरण्यकुशजलान्यादाय (जामातृदक्षिणकरोपरि कन्यादक्षिणकरं निधाय) सापिण्ड्यनिर्णयार्थं गोत्रोच्चारं ब्राह्मणाः कुर्वन्ति।

अथ वरपक्षे प्रथमशाखोच्चारः–

ॐ गणानांत्वा गणपंतिꣳ० हवामहे प्रियाणान्त्वा प्रियपंतिꣳ० हवामहे निधीनात्वा निधिपतिꣳ० हवामहे व्वसो मम। आऽहमंजानि गर्भ्भधमा त्वमंजासि गर्भ्भधम्।

श्री सीता रघुनायकश्च गिरिजा शंभुर्गणेशस्तथा। नंदी षण्मुख लक्ष्मणौ च भरतः कूजोद्भवः शत्रुहा।
सर्वे ते मुनयः सुराश्च दितिजास्तीर्थादि नद्योनदाः। दिक्पालाः शशिभास्करौ च हनुमान् कुर्वन्तु नो मंगलम्॥

अस्यां रात्रावस्मिन् मङ्गलमण्डपाभ्यन्तरे स्वस्तिश्रीमद्विविधविद्याविचार चातुर्य-विनिर्जित-सकल-वादिवृन्दोपरि-विराजमान-पद-पदार्थ—साहित्य—रचनामृतायमान—कल्पकौतुक-चमत्कार-पारिजात—विसर्ग—सुन्दर-सारस्वत-सहजातगुणानुभाव-गुणाकर-गुम्फितयशः-सुरभीकृतमङ्गलमण्डलस्य स्वस्ति श्रीमतः शुक्ल-यजुर्वेदान्तर्गतमाध्यन्दिनशाखाध्येतुः कात्यायनसूत्रिणः अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्रः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखाध्येतुः कात्यायनसूत्रिणः अमुकशर्मणः पौत्रः, शुक्लयजुर्वेदान्तर्गत माध्यन्दिनशाखाध्येतुः कात्यायनसूत्रिणः अमुकगोत्रस्य अमुकशर्मणः पुत्रः प्रयतपाणिः शरणं प्रपद्ये स्वति संवादे उभयोर्वृद्धिर्वरकन्ययोर्मङ्गलमास्तां वरश्चिरजीवी भूयात्, कन्या सावित्री भवताद्। (इति वरपक्षे प्रथमशाखोच्चारः) ॥ १ ॥

अथ कन्यापक्षे प्रथमशाखोच्चारः

कन्यापक्षे—ॐ पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतामपुनर्ब्रह्माणो वसुनीथयज्ञैः।
घृतेनत्वन्तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः।
ईशानो गिरिशो मृडःपशुपतिःशूलीशिवःशङ्करो भूतेशः प्रथमाधिपः स्मरहरो मृत्युञ्जयो धूर्जटिः।
श्रीकण्ठो वृषभध्वजो हरभगो गंगाधरस्त्र्यम्बकःश्रीरुद्रःसुरवृन्दवन्दितपदः कुर्यात्सदामंगलम्॥

अस्यां रात्रावस्मिन् मङ्गलमण्डपाभ्यन्तरे स्वस्ति श्रीमद्विविधविद्यालङ्कारशरद्विमलरोहिणीरमणरमणीयोदार-सुन्दर दामोदर-मकरन्द-महानुभावसकल-विद्या-विनीतनिजकुलकमलकलिताप्रकाशनैकभास्करसदाचारसच्चरितसकल-सत्प्रतिष्ठाश्रेष्ठविशिष्टवरिष्ठस्य स्वस्ति श्रीमतः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखाध्येतुः कात्यायनसूत्रिणोऽमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्रीम्, शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखाध्येतुः कात्यायनसूत्रिणः अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौत्रीम्, शुक्लयजुर्वेदान्तर्गत माध्यन्दिन शाखाध्येतुः कात्यायन सूत्रिणः अमुकगोत्रस्य अमुकशर्मणः पुत्रीं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संवादेषु उभयोर्वृद्धिर्वरकन्ययोर्मङ्गलमास्तां वरश्चिरञ्जीवी भवतात्, कन्या सावित्री भूयात् (इति कन्यापक्षे प्रथमशाखोच्चारः)॥ १ ॥

अथ वरपक्षे द्वितीयशाखोच्चारः

ॐ यथे॒ मां वा॑चं कल्या॒णी मा॒ वदा॑नि॒ जने॑भ्यः । ब्र॒ह्म॒राज॒न्या॒भ्या॑ ᳪ शू॒द्राय॒ चार्य्या॑य च॒ स्वाय॒ चार॑णाय च । प्रि॒यो दे॒वानां॒ दक्षि॑णायै दा॒तुरि॒ह भू॑या सम॒यम्मे॒ काम॒ः समृ॑द्धयता॒ मुप॑ मा॒दो नमतु ।

रासोल्लासभरेण विभ्रमभृतामाभीरवामध्रुवामभ्यर्णं परिरम्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्यगीतस्तुतिर्व्याजालिङ्गनचुम्बितः स्मितमनोहारी हरिः पातु वा ॥
अस्यां रात्रावस्मिन्० ..... कन्या सावित्री भूयात् ॥ २ ॥

अथ कन्यापक्षे द्वितीयशाखोच्चारः

ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योति-रेकन्तन्मे मनः + शिवसङ्कल्पमस्तु ।

देयं वारि कथं यतः सुरधुनी मौलौ कथं पावके देव्यस्तद्धि विलोचनं कथमहिर्देव्यः स चाङ्के तव ।
तस्माद् द्यूतविधौ त्वयाऽद्य मुषितो हरिः परित्यज्यतामित्थं शैलसुता विहस्य लपितः शम्भुः शिवायास्तु वः ॥
अस्यां रात्रावस्मिन् मङ्गलमण्डपाभ्यन्तरे०.....कन्या सावित्री भूयात् ॥ २ ॥

अथ वरपक्षे तृतीयशाखोच्चारः

ॐ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् । इदं हिरण्यं वर्चस्वज्जैत्रायाऽऽविशतादु मामु ।

गंगा सिन्धुसरस्वती च यमुना गोदावरी नर्मदा । कावेरी सरयुर्महेन्द्रतनया चर्मण्वती वेणिका ।
क्षिप्रा वेत्रवती महासुर नदी ख्याता गया गंडकी । पूर्णा पूर्ण जलैः समुद्र सहिताः कुर्वन्तु नो मंगलम् ॥
अस्यां रात्रावस्मिन् मङ्गलमण्डपाभ्य०.....सावित्री भूयात् ॥ ३ ॥

अथ कन्यापक्षे तृतीयशाखोच्चारः

ॐ श्रीश्चंते लक्ष्मीश्चपत्न्यां वहोरात्रे पार्श्वे नक्षंत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुम्मंइषाण सर्व्वलोकम्मंइषाण।

कौशल्याविशदालवालजनितः सीतालताऽऽलिङ्गितः, सिक्तः पङ्क्तिरथेन सोदरमहाशाखाऽभिसम्वर्द्धितः।
रक्षस्तीव्रनिदाघपाटनपटुश्छायाश्रितानन्दकृद्, युष्माकं स विभूतये स्तु भगवान् श्रीरामकल्पद्रुमः॥

अस्यां रात्रावस्मिन् मङ्गलमण्डपा०.....सावित्री भूयात्।

प्रार्थना—

ॐ कन्यां कनकसम्पन्नां कनकाभरणैर्युताम्। दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ १॥
गौरीं कन्यां सुशीलां च यथाशक्ति विभूषिताम्। कन्यार्थिने श्रीवराय तुभ्यं दत्तां समाश्रय॥ २॥
कन्ये मयाग्रतो भूयाः कन्या मे देवि पार्श्वयोः। कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम्॥ ३॥
मम वंशकुले जाता पालिता बहुवत्सरम्। तुभ्यं वर मया दत्ता पुत्रपौत्रविवर्धिनी॥ ४॥
विश्वेशः सर्वभूतात्मा साक्षिण्यः सर्वदेवताः। इमां कन्यां प्रदास्यामि पितॄणां तारणाय च॥ ५॥

उदङ्मुखः कन्यापिता प्रत्यङ्मुख्याः कन्याया दक्षिणहस्तांगुष्ठं गृहीत्वा प्राङ्मुखाय वराय (वरदक्षिणहस्ते), शुभलग्ने कन्यां सङ्कल्पयेत् । कांस्यपात्रे पत्नीहस्तेन सन्ततां जलधारां दापयेत् ।

अब कन्या पिता उत्तर मुख तथा कन्या पश्चिम मुख बैठाकर कन्या का दाहिना हाँथ का अंगूठा पकड़कर पूर्वमुख बैठे वर के दाहिने हाथ में कन्यादान का संकल्प करे शंख से जल धारा देता रहे—

"ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे वैवश्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्त्तैकदेशान्तर्गत अमुकक्षेत्रे बौद्धावतारे अमुकसम्वत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा यथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ गोत्रः सपत्नीकोऽहम् अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाऽध्यायिनोऽमुकशर्मणः

प्रपौत्राय, अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाऽध्यायिनोऽमुकशर्मणः पौत्राय, अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाध्यायिनोऽमुकशर्मणः पुत्राय आयुष्मते श्रीधररूपिणे कन्यार्थिनेऽमुकगोत्राय अमुकप्रवराय अमुकशर्मणे वराय, अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाऽध्यायिनोऽमुकशर्मणः प्रपौत्रीम्, अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाऽध्यायिनोऽमुकशर्मणः पौत्रीम्, अमुकगोत्रस्य अमुकप्रवरस्य माध्यन्दिनशाखाऽध्यायिनोऽमुकशर्मणः पुत्रीम् आयुष्मतीम् श्रीधररूपिणीम् वरार्थिनीम् अमुकनाम्नीम् इमां कन्यां सालङ्कारां यथाशक्त्यलङ्कृतां प्रजापतिदैवतां पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्र-समफलप्राप्तिपूर्वकं मम समस्तपितृणां निरतिशयानन्दब्रह्मलोककन्यादानकल्पोक्तफलावाप्तिपूर्वकं च श्रीलक्ष्मीनारायणप्रीतये अनेन वरेण अस्यां कन्यायाम् उत्पादयिष्यमाणसन्तत्या द्वादशावरान् द्वादशपरान् पुरुषान् आत्मानं च पवित्रीकर्तुं अस्याः कन्याया अनेन वरेण धर्मप्रजया उभयोर्वंशयोर्वृद्ध्यर्थं देवाऽग्निगुरुसन्निधौ अग्न्यादिसाक्षिकतया

सहधर्माचरणाय तुभ्यमहं सम्प्रददे।" इति उत्थाय कन्यादक्षिणहस्तं वरदक्षिणहस्ते समर्पयेत्।

वर कन्या हस्त प्राप्तकर स्वस्ति कहे और—कन्या पिता वर की प्रार्थना करे—

ततो वरः—"ॐ स्वस्ति" "ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु" इति पठन् गृह्णीयात्। ततो दाता (कन्या पिता) वरं प्रार्थयेत्—

गौरीं कन्यामिमां पूज्य ! यथाशक्ति विभूषिताम्। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ १ ॥
कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः। कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ १ ॥
कन्या मम कुले जाता पालिता वत्सराष्टकम्। तुभ्यं पूज्य मया दत्ता पुत्र-पौत्रविवर्धिनी ॥ ३ ॥
धर्मस्याचरणं सम्यक् क्रियतामनया सह। धर्मे चार्थे च कामे च यत्त्वं नातिचरे विभो ॥ ४ ॥

"यस्त्वया धर्मश्चरितव्यः सोऽनया सह, धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम्"। वरः—"नातिचरामि" इति पठेत्। ततः "कृतस्य कन्यादानकर्मणः साङ्गतासिद्ध्यर्थं

तत्सम्पूर्णफलप्राप्त्यर्थं इदं सुवर्णं अग्निदैवतं अमुकगोत्राय अमुकशर्मणे वराय दक्षिणात्वेन तुभ्यमहं सम्प्रददे" इति दक्षिणां दद्यात् ॥ ततः—"ॐ स्वस्ति" इति वरो ब्रूयात्। पश्चात्—

द्यौस्त्वा० मंत्र को पढ़ता हुवा वर ग्रहण करे और कन्या दाता यस्त्वया पढ़कर वर के प्रति कहे। वर नातिचरामि कहे। और कोदात् कस्माऽअदात्कामो का पाठ ३ बार करै।

"ॐ कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात्। कामो दाता कामं ÷ प्रतिग्रहीता कामैतत्ते ॥" इति वरः त्रिवारं कथयेत्।

अत्राचारात् कन्यापिता तद्बान्धवाश्च यथाशक्ति यौतकत्वेन सुवर्ण-रजत-ताम्र-पित्तलपात्राणि गो-महिषी-अश्व-शय्यां-दासी-दास-ग्रामादिकं वर-कन्याभ्यां प्रयच्छन्ति।

अब कन्या के पिता से दी हुई कन्या को वर ग्रहण करे और नीचे लिखे यदैषि मनसा को पढ़ता हुवा निकले और वेदी की दक्षिण दिशा में जल पूर्ण कलश लेकर एक पुरुष तब तक खड़ा रहे जब तक उनका अभिषेक न हो जाय और ग्रन्थिबन्धन वर-कन्या का कर दे।

अथ वरः पित्रा प्रत्तां कन्यामादाय वामहस्ते गृहीत्वा निष्क्रामति ।

(यदैषात्यस्याथर्वण ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता निष्क्रमणे वि०) "ॐ यदैषि मनसादूरं दिशोऽनु पवमानोवा ॥ हिरण्यपर्णो वैकर्णः स त्वांमन्मनसां करोतु; अमुकिदेवि"

इति कन्यानामग्रहणम् । ततो वेद्याः दक्षिणदिशि वारिपूर्णकलशं ऊर्ध्वं तिष्ठतो मौनिनो दृढपुरुषस्य स्कन्धे अभिषेकपर्यन्तं धारयेत् । अत्राचारात् पुरोहितादिर्वरकन्ययोः ग्रन्थिबन्धनं कुर्यात् ।

निम्न मंत्रों को पढ़ता हुआ वर और कन्या एक दूसरे को देखे ये चारो मंत्र निम्न हैं ।

ततः—कन्यापिता 'परस्परं समीक्षेथाम्' इति प्रैषेण समीक्षयति वरः प्रेम्णा समीक्षमाणश्चतुरो मन्त्रान् पठति । (अघोरचक्षुरिति प्रजापतिर्ऋषिराद्यन्तयोस्त्रिष्टुप्छन्दो मध्यमयोरनुष्टुप्छन्दः कुमारी देवता परस्परसमीक्षणे वि०)

ओं अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे ॥ १ ॥ सोमःप्रथमो विविदे गन्धर्वोविविदऽउत्तरः । तृतीयोऽ-

ग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ २ ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथोऽ इमाम॥३॥ सा नः पूषा शिवतमामेरय सा नऽऊरूऽउशती विहर। यस्यामुशन्तः प्रहराम शेषं यस्यामु कामा बहवो निविष्ट्यै ॥ ४ ॥ इति।

कन्या पिता—ब्राह्मण भोजन संकल्प—भूयसीदक्षिणा का संकल्प करे और सबको भूयसी दक्षिणा बाँट कर दे।

(अत्र कन्यापिता ब्राह्मणभोजनं संकल्प्य ब्राह्मणेभ्यो दक्षिणां दत्त्वा भूयसीं दद्यात्। तद्यथा—"सपत्नीकोऽहं कन्यादानकर्मणः साङ्गतासिद्धचर्थं तत्सम्पूर्णफलप्राप्त्यर्थं श्रीलक्ष्मी-नारायणदेवताप्रीतये इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यो नटनर्तकगायकेभ्यश्च विभज्य दास्ये।" ततः—"ओं प्रमादात् कुर्वतां कर्मप्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः"। "यस्य स्मृत्या च नामोक्त्यातपोयज्ञ क्रियादिषु। न्यूनं सम्पूर्णतां यातु सद्योवन्दे तमच्युतम्। इत्युक्त्वा, ओं "विष्णवे नमः" इति ३ वारं पठेत्)।

अथ विवाहहोमः आचार्यब्रह्मावरणम् ।

पूर्वं वधूमग्रतः कृत्वा अग्निं प्रदक्षिणीकृत्य ततः वधूं दक्षिणतः कृत्वा एकस्मिन्नासने उपविशति । तत आचम्य प्राणानायम्य "अमुकशर्माऽहं मत्प्रतिगृहीतवधूद्देश्यकभार्यात्व-सिद्धिपूर्वकधर्मार्थकामसिद्धिद्वारा श्रीपरमेश्वरप्रीतये ब्राह्मदिवाहविधिना पितृदत्तामिमां कन्यां विवाहयिष्ये" इति सङ्कल्प्य, अग्न्यायतनादीशान्यां ब्रह्मवरणं कुर्यात् । तद्यथा— "तत्पूर्वाङ्गतया विवाहहोमकर्मणि कृताकृतावेक्षणादिब्रह्मकर्मकर्तुममुकशर्म्माणं ब्राह्मणं आचार्यत्वेन त्वामहं वृणे । प्रार्थना-आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेस्मिन् नाचार्यो भव सुव्रतः ॥ १ ॥ ब्रह्मवरणम्—अद्य विवाह होम कर्मणि कृता-कृतावेक्षणरूप ब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं (एभिः पुष्प—चन्दन—ताम्बूल—वासोभिः) ब्रह्मत्वेन त्वामहं वृणे" । "ॐ व्रतोऽस्मि" इति ब्रह्मा वदेत् ।

(वरः)—यथा चतुर्मुखो ब्रह्मा सर्वदेवधरः प्रभुः ।

तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम् । इति प्रार्थयेत् ।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।

यथा विहितं कर्म कुरू । इति वरः । यथा ज्ञानं करवावः ब्रह्माऽऽचार्यो वदेताम् ।

अब वर-वधू को आगे करके अग्नि की प्रदक्षिणा कर वधू को दक्षिण भाग में कर एक आसन पर बैठे—आचमन प्राणायाम कर—संकल्प पढ़ आचार्य और ब्रह्मा का वरण करे—आचार्य की प्रार्थना—आचार्यस्तु यथास्वर्गे से करे——ब्रह्मा की स्तुति—यथा चतुर्मुखो ब्रह्मा से करे । व्रतेन दीक्षा मंत्र से आचार्य ब्रह्मा को कलावा बाँधकर प्रतिज्ञा करावे—आचार्य-ब्रह्मा यथाज्ञानं कहकर प्रतिज्ञा करे ।

एवमुत्तरासने ब्रह्माणं वृत्वा अग्नेः पूर्वेण दक्षिणपादेन पश्चिमतो वा गमयित्वा पूर्वकल्पिते दक्षिणासने उपवेशयेत् । ब्रह्मा वाग्यतश्च भवेत् । ब्रह्मण अभावे पञ्चाशत्कु-

शनिर्मितं प्रदक्षिणग्रन्थिकं ब्राह्मणमग्नेः पुरस्तात् पश्चाद्वाऽऽहनीयाग्नेर्दक्षिणे पीठादौ प्रागग्रास्तीर्णदर्भेषु स्थापयेत्। प्रतिनिधिभूत-आचार्य अग्नेरुत्तरतः पश्चिमभागे प्रणीता-संस्कारार्थमेकमासनं, पूर्वभागे प्रणीताप्रणयनार्थं द्वितीयमासनं प्राग्ग्रैः कुशैः कल्पयित्वा प्रणीतापात्रं सव्यहस्ते कृत्वा जलेन परिपूर्य कुशैराच्छाद्य ब्रह्मणा मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात्। ततः परिस्तरणं पूर्वादिदिक्षु चतुर्भिश्चतुर्भिस्त्रिभिस्त्रिभिर्वा कुशैः आग्नेयादीशानान्तम्, ब्रह्मणोऽग्निपर्यन्तम्, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीता-पर्यन्तं कुर्यात्।

कुशकण्डिका विधिः

उत्तर की ओर ब्रह्मा को आसन देकर अग्नि के पूर्व से दक्षिण पाद पश्चिम को जाय पहले स्थापित किये आसन पर बैठे। ब्रह्मा कहे। यदि ब्रह्मा का अभाव हो तो ५० कुशा से निर्मित प्रदक्षिण ग्रन्थि युक्त ब्रह्मा अग्ने के सामने रखे। बाद में आधान दक्षिण पूर्व की ओर आसन दे पुन प्रणीता पात्र को सामने रखे उसमें जलभरे

कुशा से ढक दे। ब्रह्मा का मुह देखे द्वितीय आसन पर रखे। ६४ कुशाओं की बर्हिका का विधान है उसका $\frac{1}{4}$ भाग १६ कुशा लेकर परिस्तरण करे—अर्थात् अग्निकोण से ईशान कोण तक फैला दे। और ब्रह्मा के आसन से अग्नि स्थंडिल तक नैऋत्य से वायुकोण तक अग्निस्थंडिल से प्रणीता पात्र तक बिछावे।

ततः पात्रासादनम्,—अग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, सम्मार्जन-कुशास्त्रयः,—पञ्च वा, उपयमनकुशास्त्रिप्रभृतयस्त्रयोदशपर्यन्तां समिधस्तिस्रः, स्रुवः, आज्यम्, पूर्णपात्रम्, षट्पञ्चाशदधिकयजमानमुष्टिशतद्वयपरिमिततण्डुल-पूर्णम्, पवित्रच्छेदन-कुशानां पूर्वपूर्वदिशि क्रमेणाऽऽसादनीयम्।

अथ तस्यामेव दिशि असाधारणवतून्युपकल्पनीयानि। तत्र शमीपत्रमिश्रा लाजाः। दृषदुपलम्। कुमारीभ्राता। शूर्पः। दृढपुरुषः। अन्यदपि तदुपयुक्तमालेपनादिद्रव्यम्।

अथ पात्रासादनम्

अग्नि के उत्तर की ओर से पश्चिम दिशा में पवित्री की तीन कुशा रखे। उसके पास ही (२) कुशा रखे। इसी प्रकार उत्तर की ओर बराबर पश्चिम की तरफ क्रम–से पात्र को रखता चला जाय। प्रोक्षणी पात्र, घी का पात्र, पाँच कुशा, उपयमनार्थ ७ कुश, ३ समिधा, स्रुवा, घी, पूर्णपात्र और शमीपत्र मिले धान का लावा, बांट (लोढ़ा) कन्या भ्राता-रूप और दृढ़पुरुष, ऐपन (आलेप करने वाला द्रव्य) पवित्री बनावे—आसादनी में रखी २ कुशा के ऊपर कुशा को रखकर दोनों को प्रदक्षिणा के क्रम से घुमा कर सामने की ओर लावे तीन कुशा से खींचकर उसका छेदन (काट दे) कर दे। और उसी कुश की पत्नी की पवित्री बनावे। पवित्री के हाथ से प्रणीता का जल ३ वार प्रोक्षणी पात्र में डाले, अनामिका तथा अंगूठे से पवित्री पकड़कर ३ वार प्रोक्षणी पात्र के जल से ऊपर को उछाले। दो वार प्रोक्षणी पात्र को बाएँ हाथ में ग्रहण कर और दाहिने हाथ से ऊँचा ऊपर की ओर उछाले। प्रणीता के जल से ही प्रोक्षणी का प्रोक्षण जल छिड़ककर करे। प्रोक्षणी पात्र के जल से आसादन किये हुए सभी पदार्थों का प्रोक्षण जल छिड़ककर करे। फिर उसी क्रम से हाथ उल्टा घुमावे तो इतरथा वृत्ति होती है। और स्रुव को उसका मुख नीचे करके तपावे।

ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकाङ्गुष्ठाभ्याम् । उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणम्। त्रिरुदिङ्नम् प्रणीतोदकेन प्रोक्षणीप्रोक्षणम्। प्रोक्षणीजलेन यथाऽऽसादित वस्तुसेचनम् । ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानम् । आज्यस्थाल्यामाज्यनिर्वापः । ततोऽधिश्रयणम् । ततो पर्याग्निकरणम् । ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण बह्नौ तत्प्रक्षेपः । ततः स्रुवपूतपनं कृत्वा ।

सम्मार्जन कुशा को जो ५ कुशसमूह का होता है उससे अग्रभाग से सुवा के नीचले भाग को पोछे और मूल से ऊपरी भाग का सम्मार्जन करे । स्रुव के ऊपर प्रणीता का जल से छींटा दे । सम्मार्जन कुशा का अग्नि में त्याग करे । फिर दुबारा स्रुवा को तपावै और दक्षिण तरफ रखे । घी को अग्नि से उतारे । प्रणीता की पश्चिम तरफ रखे । अनामिका और अंगूठे से पवित्री पकड़कर प्रोक्षणी की ओर घी को उछाले । उसे देखकर पड़ी हुई वस्तु को निकाल दे । पुनः दुबारा प्रोक्षणी जल उछाले । बाद में अग्नि के पश्चिम तरफ घी रखे । बायें हाथ में उपयमन कुशा जो ७ कुशसमूह है लेकर दायें हाथ में घी डूबे हुए ३ समिधा लेकर मनमें ही

मौन होकर प्रजापति का ध्यानकर अग्नि में छोड़े। फिर बैठ जाय। पवित्री वाले हाथ से प्रोक्षणी का जल ले ईशानकोण से प्रदक्षिण क्रम से ईशान तक लाकर अग्निका पर्युक्षण करे। फिर इतरथा वृत्ति करे। पवित्री को प्रणीता में रखे। दाया घुटना मोड़े कुशा से ब्रह्मा को छूये और प्रज्वलित अग्नि में घी की आहुति स्रुवा से दे।

सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमार्ज्य प्रणीतोदकेनाऽभ्युक्ष्य पुनः स्रुवं प्रतप्य दक्षिणतो निदध्यात्। तत आज्यस्याग्नेरवतारणम्। तत आज्यस्य प्रोक्षणीवदुत्पवनम्। अवेक्ष्य सत्यपद्रव्ये तन्निरसनम्। पुनः प्रोक्षणीवदुत्पवनम्। तत आज्यमग्नेः पश्चिमतो निधाय उपयमनकुशानादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यायन् तूष्णीमग्नौ घृताक्तास्तिस्रः समिधः क्षिपेत्। तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाऽऽज्याहुतीर्जुहोति।

ॐ प्रजापतये स्वाहा० से लेकर १२ आहुति का विधान है उन्हें दे दें और प्रत्येक आहुति के अन्त में बचे हुए स्रुवा के घी को प्रोक्षणी पात्र में न मम कहता हुआ छोड़ता जाय। प्रजापति और इन्द्र ये दो देवता की

आधार संज्ञा है। अग्नि सोम ये दो देव आज्यभाग हैं। भूः भुवः स्वः ये ३ महाव्याहृती हैं। त्वं नो० से उदुत्तमं वरूण तक प्रायश्चितसंज्ञक होमाहुति हैं।

तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं वा स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः। (प्रजापतये स्वाहा, इन्द्राय स्वाहेत्यन्योर्वामदेव ऋषिर्यजुश्छन्दः क्रमेण प्रजापतीन्द्रौ देवते पूर्वोत्तराघारहोमे वि०) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। इति मनसा। ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम। (इत्याघारौ)। (अग्नये स्वाहा, सोमाय स्वाहेत्यनयोर्वामदेव ऋषिर्यजुषी अग्निः सोम इति क्रमेण देवते आज्यहोमे वि०) ॐ अग्नये स्वाहा, इदमग्नये न मम। ॐ सोमाय स्वाहा, इदं सोमाय न मम। (इत्याज्यभागौ)। (महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवता होमे वि०) ॐ भूः स्वाहा, इदमग्नये न मम। ॐ भुवः स्वाहा, इदं वायवे न मम। ॐ स्वः स्वाहा, इदं सूर्याय न मम। (एता महाव्याहृतयः) (त्वन्नः

सत्वन्न इत्यनयोर्वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते सर्वप्रायश्चित्तहोमे विनियोगः)।
ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः।यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥ १ ॥ ॐ स त्वन्नोऽ अग्नेऽवमो भवोती नेदिष्ठोऽअस्याऽ उषसो व्युष्टौ। अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीक ᳬ सुहवो नऽ एधि-स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥ २ ॥

(अयाश्चाग्ने इत्यस्य वामदेव ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता होमे विनियोगः)।

ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽ असि ॥ अया नो यज्ञं व्वाहास्यया नो धेहि भेषज ᳬ स्वाहा ॥ इदमग्नये न मम ॥ ३ ॥

(ये ते शतमित्यस्य वामदेव ऋषि त्रिष्टुप्छन्दः वरुणः सविता विष्णुर्विश्वेभ्यो मरुतः स्वर्का देवता होमे वि०)।

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य

सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः--स्वाहा । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ४ ॥

(उदुत्तममिति शुनःशेप ऋ० त्रिष्टुप्छन्दो वरुणो देवता होमे विनि०) ।

ओं उदु॑त्त॒मं व्व॑रुण॒ पाश॑म॒स्मदवा॑ध॒मं व्विम॑ध्य॒म ँ श्र॑थाय ॥ अथा॑ व्व॒यमा॑दित्य व्र॒ते तवाना॑गसो॒ऽ अदि॑तये स्याम--स्वाहा । इदं वरुणाय दित्यायादितये न मम ॥ ५ ॥

इति प्रायश्चितसंज्ञकाः द्वादशाहुतयः ।

अथ राष्ट्रभृद्धोम्

कुशा से ब्रह्मा को हटाकर तब ऋताषाड० से लेकर प्रजापति विश्वकर्मा तक १२ मंत्रों से राष्ट्रभृद्होम की आहुति दे ।

अन्वारब्धं बिना राष्ट्रभृद्धोमः कर्तव्यः । (ऋताषाडिति द्वादशानां प्रजापतिर्ऋ० यजुश्छन्दो लिङ्गोक्ता देवता होमे विनियोगः ।)

ओं ऋताषाड्ऋतधामाऽग्निर्गन्धर्वः स न ऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्। इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय न मम ॥ १ ॥ ओं ऋताषाड्ऋतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदोनाम ताभ्यः स्वाहा। इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यश्च न मम।२। ओं सꣳ हितो व्विश्वसामा सूर्यो गन्धर्वः स न ऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाट्। इदꣳ स ꣳ हिताय व्विश्वसाम्ने सूर्याय गन्धर्वाय न मम ॥३॥ ओं सꣳ हितो व्विश्वसामा सूर्यो गन्धर्व्वस्तस्य मरीचयोऽप्सरस ऽआयुवो नाम ताभ्यः स्वाहा। इद मरीचिभ्योऽप्सरोभ्य ऽआयुयो न मम ॥ ४ ॥ ओं सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्व्वः स न ऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्व्वाय न मम ॥ ५ ॥ ओं सुषुम्णः सूर्यरश्मिचन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा। इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो न मम ॥ ६ ॥ ओं इषिरो व्विश्वव्यचा व्वातो गन्धर्व्वः स न ऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाट्। इदमिषिराय व्विश्वव्यचसे

वाताय गन्धर्वाय नमम ॥७॥ ओं इषिरो विश्वव्यचा व्वातो गन्धर्व्वस्तस्यापोऽप्सरस ऽऊर्ज्जो नाम ताभ्यः स्वाहा। इदमद्भ्योऽप्सरोभ्यऽअभ्यों न मम ॥ ८ ॥ ओं भुज्युः सुपर्णो यज्ञो गन्धर्व्वः स न ऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाट्। इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम ॥ ९ ॥ ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा ऽअप्सरसस्तावा नाम ताभ्यः स्वाहा। इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यो न मम ॥ १० ॥ ओं प्रजापतिर्व्विश्वकर्मा मनो गन्धर्व्वः स न ऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाट्। इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम ॥ ११ ॥ ओं प्रजापतिर्व्विश्वकर्मा मनो गन्धर्व्वस्तस्य ऽऋक्सामान्यप्सरस ऽएष्टयो नाम ताभ्यः स्वाहा। इदं ऋक्सामभ्योऽप्सरोभ्य एष्टिभ्यो न मम ॥ १२ ॥ इति राष्ट्रभृद्धोमः।

अथ त्रयोदशमन्त्रात्मक जयाहोमः।

निम्न मन्त्रों की संख्या १३ है इनसे जया होम करै।

(चित्तं चेत्यादीनां परमेष्ठीप्रजापतिर्ऋषिर्यजुश्छन्दः चित्तादयो देवता होमे विनियोगः)।

ॐ चित्तं च स्वाहा, इदं चित्ताय न मम ॥ १ ॥
ॐ चित्तिश्च स्वाहा, इदं चित्त्यै न मम ॥ २ ॥
ॐ आकूतं च स्वाहा, इदमाकूताय न मम ॥ ३ ॥
ॐ आकूतिश्च स्वाहा, इदमाकूत्यै न मम ॥ ४ ॥
ॐ विज्ञातं च स्वाहा, इदं विज्ञाताय न मम ॥ ५ ॥
ॐ विज्ञातिश्च स्वाहा, इदं विज्ञात्यै न मम ॥ ६ ॥
ॐ मनश्च स्वाहा, इदं मनसे न मम ॥ ७ ॥
ॐ शक्वरीश्च स्वाहा, इदं शक्वरीभ्यो न मम ॥ ८ ॥
ॐ दर्शश्च स्वाहा, इदं दर्शाय न मम ॥ ९ ॥
ॐ पौर्णमासं च स्वाहा, इदं पौर्णमासाय न मम ॥१०॥
ॐ बृहच्च स्वाहा, इदं बृहते न मम ॥ ११ ॥
ॐ रथन्तरञ्च स्वाहा, इदं रथन्तराय न मम ॥१२॥

ओं प्रजापतिर्ज्जयानिन्द्राय व्वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै व्विशः समनमन्तः सर्व्वाः स ऽउग्रः स ऽइ हव्यो बभूव स्वाहा । इदं प्रजापतये जयानिन्द्राय न मम ॥ १३ ॥ इति जयाहोमः । (उदकोपस्पर्शः)

अथाभ्यातानहोमः ।

प्रणीता के जल का स्पर्श करे । फिर निम्नलिखित १८ मन्त्रों से हवन करे जहाँ-जहाँ प्रणीतोदक स्पर्शः का संकेत है वहाँ-वहाँ प्रणीता के जल से हाथ का स्पर्श करता जाय ।

(अग्निर्भूतानामित्यादीनां प्रजापतिर्ऋषिः पङ्क्तिश्छन्दोऽग्न्यादयो मन्त्रोक्ता देवता होमे विनियोगः)।

ॐ अग्निर्भूतानामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा । इदमग्नये भूतानामधिपतयेन मम ॥१॥ ओं इन्द्रो ज्ज्येष्ठानामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा । इदमिन्द्राय ज्येष्ठानामधिपतये न मम ॥ २ ॥ ओं यमः पृथिव्याऽधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा । इदं यमाय पृथिव्या अधिपतये न मम ॥ ३ ॥ (अत्र प्रणीतोदकस्पर्शः) । ओं वायुरन्तरिक्षस्याधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा । इदं वायवेअन्तरिक्षस्याधिपतयेनमम ॥४॥ ओं सूर्योदिवोऽधिपतिः स माऽवत्वस्मिन्ब्रह्मण्यास्मिन् चत्रेऽस्यामाशिष्यस्यां

पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याष्ठं स्वाहा । इदं सूर्याय दिवोऽधिपतये न मम ॥ ५ ॥ ॐ चन्द्रमा नक्षत्राणामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ९ स्वाहा । इदं चन्द्रमसे नक्षत्राणामधिपतये न मम ॥ ६ ॥ ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा । इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम ॥ ७ ॥ ओं मित्रः सत्यानामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ५ स्वाहा । इदं मित्राय सत्यानामधिपतये न मम ॥ ८ ॥ ओं वरुणोऽपामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ५ स्वाहा । इदं वरुणायाऽपामधिपतये न मम ॥ ९ ॥ ओं समुद्रः स्रोत्यानामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ५ स्वाहा इदं समुद्राय स्रोत्यानामधिपतये न मम ॥ १० ॥ ओं अन्न ५ साम्राज्यानामधिपतिः तन्माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ५ स्वाहा । इदमन्नाय

साम्राज्यानामधिपतये न मम ॥ ११ ॥ ओं सोमऽओषधीनामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं सोमाय ओषधीनामधिपतये न मम ॥ १२ ॥ ओं सविता प्रसवानामधिपतिः स माऽवत्वस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं सवित्रे प्रसवानामधिपतयेः न मम ॥ १३ ॥ ओं रुद्रः पशूनामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥ इदं रुद्राय पशूनामधिपतये न मम ॥ १४ ॥ (अत्र प्रणीतोदकस्पर्शः) । ओं त्वष्टा रूपाणामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं त्वष्ट्रे रूपाणामधिपतये न मम ॥ १५ ॥ ओं विष्णुः पर्व्वतानामधिपतिः स माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं विष्णवे पर्वतनामधिपतये न मम ॥ १६ ॥ ओं मरुतो गणानामधिपतयस्ते माऽवत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ॥ १७ ॥ ओं पितरः पितामहाः परेऽवरे ततास्ततामहाः । इह माऽवन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यो न मम ॥ १८ ॥ अत्र प्रणीतोदकस्पर्शः । इत्यभ्यातानसंज्ञको होमः ।

अथ पञ्चाहुतयः ।

अब नीचे लिखे ४ मन्त्रों से आहुति देकर प्रणीता के जल का स्पर्श करे। बाद में वर-वधू के सामने अन्तःपट करे। और परं मृत्यो मन्त्र पढ़कर आहुति दी जाय बाद में प्रणीता के जल का स्पर्श करे।

(अग्निरैत्वित्यादीनां चतुर्णां प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः लिङ्गोक्ता देवता होमे विनियोगः)

ओं अग्निरैतु प्रथमो देवतानाꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयꣳ राजा व्वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्न रोदात् स्वाहा । इदमग्नये न मम ॥ १ ॥ ओं इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुद्धयतामियꣳ स्वाहा । इदमग्नये न मम ॥ २ ॥ ओं स्वस्ति नो ऽअग्ने दिव ऽआ पृथिव्या व्विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा । इदमग्नये न मम ॥ ३ ॥ ओं सुगं नु पन्थां प्रदिशन्न ऽएहि ज्ज्योतिष्मद्धेह्यजरन्न ऽआयुः । अपैतु मृत्युरमृतन्न ऽआगाद्वैवस्वतो नोऽ अभयं कृणोतु स्वाहा । इदं वैवस्वताय न मम ॥ ४ ॥ (अत्र प्रणीतोदकस्पर्शः) ।

अथ वरवध्वोरग्नेश्च मध्येन्तःपटं तूष्णीं कुर्यात् ।

(परं मृत्युवित्यस्य सङ्कसुक ऋषिः त्रिष्टुप्छन्दः मृत्युर्देवता होमे विनियोगः) ।

ॐ परं मृत्यो ऽअनु परेहि पन्थां यस्तेऽ अन्यऽ इतरो देवयानात् । चक्षुष्मते शृण्वते तेँ ब्रवीमि मा नः प्रजा ꣳ रीरिषो मोत व्वीरान् स्वाहा ॥ इदं मृत्यवे न मम ॥ ५ ॥ अत्र प्रणीतोदकस्पर्शः ॥

अथ कन्याकर्तृको लाजाहोमः ।

अब निम्न प्रकरण में लाजाहोम का विधान है इसमें वधू को आगे करके वर पूर्व की तरफ मुँह करके खड़े हो जाँय और वर की अंजली में वधू की अंजली रहे और कन्या का भाई घी में शमी के पत्ते, पलाश मिले धान का लावा वधू के हाथ की अंजली में छोड़े ऐसी आहुति ३ बार दे ।

अथ कुमार्या भ्राता शमीपत्रमिश्रान् लाजान् घृतेनाभिधार्य सम्प्रोक्ष्य नवीनशूर्पे चतुर्धा कृत्वा, प्रत्येकं प्रथमं भागं स्वकीयेनाञ्जलिना कुमारी अञ्जलौ आवपति । कुमारी च तान् लाजान् अञ्जलिना गृहीत्वा प्राङ्मुखी तिष्ठन्ती मन्त्रं पठन्ती (कायतीर्थेनाञ्जलिवामपार्श्वेन) वारत्रयं जुहुयात् । वरः पत्नीमन्वारभते उदङ्मुखः प्राङ्मुखो वा । तत्र मन्त्राः—

(अर्य्यमणमिति मन्त्राणामथर्वण ऋषिरग्निर्देवता अनुष्टुप्छन्दः लाजाहोमे विनियोगः)

ॐ अर्य्यमणं देवं कन्याऽ अग्निमयक्षत । स नो ऽअर्य्यमा देवः प्रेती मुञ्चतु मा पतेः स्वाहा ॥ ॐ इदमर्य्यम्णे न मम ॥ १ ॥

अर्यमणं मन्त्र से अंजली के लावा में से तीसरा हिस्सा अग्नि में छोड़े ।

इति वर एव (ओंकारपूर्वकं) त्यागं कुर्यात् । अनेन मन्त्रेणाञ्जलिस्थलाजानां तृतीयांशम् अञ्जलिवामपार्श्वेन जुहोति ।

अब इय नायं मन्त्र से अंजली के लावा का आधा लावा होम कर दे ।

ॐ इयं नार्य्युपब्रूते लाजानावपन्तिका ॥ आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा । ॐ इदमग्नये न मम ॥२॥ अनेन मन्त्रेण लाजार्धं जुहोति ॥

इमां लाजा मन्त्र से शेष सभी लावा अग्नि में छोड़ दे ।

ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव ॥ मम तुभ्य च संवननं तदग्निरनुमन्यामियर्ठ० स्वाहा । ॐ इदमग्नये न मम ॥ ३ ॥ इत्यनेन सर्वान् लाजान् जुहोति ।

अब वर वधू का दाहिने हाथ का अंगूठा पकड़े और गृभ्णामि से लेकर शरदः शतम तक मन्त्र पढ़े ।

ततो वरो वध्वाः साङ्गुष्ठं दक्षिणं हस्तमुत्तानं गृह्णाति ।

(गृभ्णामीत्यादीनां याज्ञवल्क्यभरद्वाजाथर्वप्रजापतय ऋषयस्त्रिष्टुबुष्णिगनुष्टुभो यजूँषि छन्दांसि भगार्यमा-सवितृपुरन्धयो देवता वधूपाणिग्रहणे विनियोगः) ॥

ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः ॥ भगो ऽअर्य्यमा सविता पुरन्धिर्मह्यन्त्वा-ऽदुर्गार्हपत्याय देवाः ॥ १ ॥ ओं अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमो ऽअहम् ॥ सामाऽहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम् ॥ २ ॥ ओं तावेहि विवहावहै सह रेतो दधावहै ॥ प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून् ॥ ३ ॥ ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥ ४ ॥ इति ।

अथ अश्मारोहणम्, गाथागानम्, ब्रह्माग्न्योर्मध्येन निष्क्रमणम्, सप्तपदी च ।

बैठी हुई वधू का दाहिना पैर वर पत्थर पर दाहिने हाथ से पकड़ कर बाये हाथ से रखवाये । वधू दाहिना पैर रखे—मंत्र पढ़े ।

अथैनां (कन्यां) अश्मानमारोहयति । अश्मनि स्थिते वरो वध्वा दक्षिणं करं वामकरेणादाय वधूदक्षिणं पादं स्वदक्षिणहस्तेन गृहीत्वा वक्ष्यमाणमन्त्रेण स्थापयेत् । (आरोहेत्यस्य अथर्वण ऋषिः अनुष्टुप्छन्दः वधूर्देवता अश्मारोहणे विनियोगः) ।

ॐ आरोहेममश्मानश्मेव त्वꣳस्थिरा भव। अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः॥१॥ इति मन्त्रेण शिलामारोहयित्वा तत्र तस्यां आरूढायामेव वरो गाथां गायति—

(सरस्वतीत्यस्य विश्वावसुर्ऋषिस्त्रिष्टुप्छन्दः सरस्वती देवता गाथागाने विनियोगः)।

ॐ सरस्वति प्रेदमव सुभगे वाजनीवति। यां त्वा व्विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः।२।

अब आगे वधू पीछे वर होकर एक साथ प्रणीता ब्रह्मा अग्नि की प्रदक्षिणा करे और तुभ्यमग्रे मंत्र पढ़े।

अथ वधूवरौ प्रदक्षिणमग्निं ब्रह्माग्न्योर्मध्येन परिक्रामतः। वर एव मन्त्रं पठेत्—

(तुभ्यमित्यस्याथर्वण ऋषिरनुष्टुप्छन्दोऽग्निर्देवता परिक्रमणे विनियोगः)।

ॐ तुभ्यमग्रे पर्य्यवहन्त्सूर्य्यां वहतु ना सह। पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह। (इति प्रथमावृत्तिः) ॥ ३ ॥

अब अग्नि के पीछे खड़े होकर लाजा होम करे, अगूंठे के साथ पकड़कर अश्मारोहण गाथागान और अग्नि की प्रदक्षिणा करे इसी प्रकार ३ बार करने से नौ लाजाहुति होती है ३ बार हस्त ग्रहण, अश्मारोहण ३ बार, गाथा गान भी ३ बार करना है।

इति पठन् वधूमग्रतः कृत्वा परिक्रामेत् । नेतरथाऽऽवृत्तिः । एवं पुनर्वारद्वयं लाजाहोमः-साङ्गुष्ठहस्तग्रहण अश्मारोहण—गाथागानाग्निप्रदक्षिणानि कुर्यात् ।

(एतेन नवलाजाहुतयः साङ्गुष्ठहस्तग्रहणत्रयम् अश्मारोहणत्रयं गाथागानत्रयं प्रदक्षिणात्रयं च सम्पद्यते) ।

अब शेष बचे हुए लावा से कन्या के भाई द्वारा दिये हुए सूप के कोण की ओर से भगाय स्वाहा पढ़कर अग्नि में होम कर दे ।

ततः कुमार्या भ्राता अवशिष्टान् सर्वान् लाजान् कुमार्यञ्जलौ ददाति । सा च तिष्ठन्ती अञ्जलिना जुहोति—

(भगाय स्वाहेति मन्त्रस्य प्रजापतिर्ऋषिर्यजुश्छन्दः भगो देवता लाजाहोमे विनियोगः)।

'ॐभगाय स्वाहा' इति मन्त्रं कन्यया वाचयति वरः । 'इदं भगाय न मम' इति वरस्त्यजेत् ।

अब आगे वर पीछे वधू होकर चौथी परिक्रमा करके वर बैठ ब्रह्मा से अन्वारब्ध होकर घी से प्रजापतये स्वाहा से होम करे। इदं प्रजा० से बचे घी को प्रोक्षणी में छोड़े।

ततः समाचारात् अग्रे वरः पश्चाद्वधूस्तूष्णीमेव चतुर्थपरिक्रमणं कुरुतः। ततो वरो यथास्थानमुपविश्य ब्रह्मणाऽन्वारब्धः—

(प्रजापतय इत्यस्य वामदेव ऋषिर्यजुश्छन्दः प्रजापतिर्देवता होमे विनियोगः)।

"ओं प्रजापतये स्वाहा" इदं प्रजापतये न मम, इति मनसा प्रजापतिं ध्यात्वा जुहुयात्। अत्र प्रोक्षणीपात्रे हुतशेषाज्यप्रक्षेपः।

(अत्र सेवरादानमिति लोकाचारो मरुदेशीयानाम्)।

अथान्तःपटम्—स्थानं प्रधानं न बलं प्रधानं स्थाने स्थितः कापुरुषोऽपि धीरः।
जनामि नागेन्द्र तव प्रभावं कण्ठे स्थितो गर्जसि शङ्करस्य ॥१॥
गजर्येऽदा तृणवच्छेदनीयो दृष्ट्वा ब्रह्मा देवतानां च मुख्यः।
वैरं मध्ये वैनतेयाहि राजं तयोरन्तः पट्टमादत्त नूनम् ॥२॥

मण्डपे मधुपर्के च लाजाहोमे तथैव च। यावत्कन्या न वामाङ्के तावत्कन्या कुमारिका ॥३॥

अथ चतुर्युगानि—सत्ये युगे स्तम्भमया महाद्रयः उल्लोच आकाशमपां निधिर्घटः।
हिरण्मयं पात्रमहो शुभाक्षतारत्नान्यभूत्कर्मठ आत्मभूः स्वयम् ॥१॥

गौरी च कन्या वर ईश्वरो वभौ स पुण्यकाला भवतात्सुमङ्गलम्।
शान्ताः शिवाश्चाप इमाः पवित्रिता निवारयन्तु प्रसभं विपद्व्रजम् ॥ २ ॥
गन्धर्वश्चैव तत्सर्वं दम्पती रक्षतात्सदा।
गन्धर्वो देवतारूप आशीर्वाद ददातु नौ ॥३॥

त्रेतायुगे स्तम्भविधिर्हिरण्मयः पट्टैर्वितानं कलशश्च जाह्नवी।
सुराजतं पात्रमथाक्षताः शुभा मुक्ता व्यधात्कृत्यमरुन्धतीपतिः ॥ १ ॥
सीता च कन्या रघुपुङ्गवो वरः सं पुण्यकालस्तनुतात्सुमङ्गलम्।
शान्ताः शिवाश्चाप इमाः पवित्रिता निवारयन्तु प्रसभं विपद्व्रजम् ॥ २ ॥
चित्तचित्तीति तत्सर्वानाहुतीनां त्रयोदश। रक्षतात्पार्वतीरुद्रविश्वदेवैः समन्विता ॥३॥

युगे वरे द्वापरनाम्नि चान्दनाः स्तम्भा वितानं नवभूर्जपत्रकैः ।
ताम्रस्य पात्राणि सिताक्षताः शुभा मुक्ताः सुकन्या द्रुपदात्मजा बभौ ॥ १ ॥
वरः किरीटी जयतां, वरः प्रभुर्दूर्वाससाऽभूयत सत्पुरोधसा ।
आनन्दसान्द्रः सुषमासमृद्धिमान् स पुण्यकालो बिभ्रियात्परां श्रियम् ॥
शान्ताः शिवाश्चाप इमाः पवित्रिता निवारयन्तु प्रसभं विपद्व्रजम् ॥ २ ॥
गोविन्दो गोकुले जातःसहितो गोपबालकैः ।
तुष्टि–पुष्टिकरोऽस्माकमायुरारोग्यकारकः ॥ ३ ॥

कलावमुष्मिन्हरिताः सुवेणवः स्तम्भा घटा मृत्तिकया विनिर्मिताः ।
कार्पासवस्त्रैः रचितं वितानकं तथाऽक्षतास्तण्डुलविग्रहाः कृताः ॥ १ ॥
सुरूपिणी भानुमती च कन्यका श्रीभोजराजो धरणीश्वरो वरः ।
अमोघ आचार्य इति प्रसिद्धिमान् स पुण्यकालो रहयत्वमङ्गलम् ॥ २ ॥

चिरञ्जीवी महातेजा उभयोश्च चिरायुषम् ।
प्रयच्छतु हरिर्देवो मनसा चिन्तितं ध्रुवम् ॥ ३ ॥ इति चतुर्युगानि ।

अथ सप्तपदी

अब ऐपन से ७ मंडल बनावे या लावा या अक्षत की ७ ढेरी रख कर उस पर वधू का पैर रखवा कर ढेरी बिगड़वा दे । इसी को सप्तपदी कहते हैं ।

ततोऽग्नेरुत्तरत आलेपनेनोत्तरोत्तरकृतसप्तमण्डलेषु एनां वधुं सप्तपदाक्रमणं वरः कारयति वक्ष्यमाणमन्त्रैः ।

(एकमिष इत्यादीनां वामदेव ऋषिर्यर्जूषि छन्दांसि प्रजापतिर्देवता सप्तपदीप्रक्रमणे विनियोगः) ।

तत्र प्रथमे—"ओं एकमिषे विष्णुस्त्वा नयतु" ? इति वरेणोक्ते वधूरेकं दक्षिपदमुदक् ददाति ॥ १ ॥
द्वितीये—"ओं द्वे ऊर्ज्जे विष्णुस्त्वा नयतु" ॥ २ ॥ तृतीये-"ओं त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु" ॥३॥
चतुर्थे-"ओं चत्वारि मायोभवाय विष्णुस्त्वा नयतु" ॥ ४ ॥ पंचमें-"ओं पञ्च पशुभ्यो विष्णुस्त्वा नयतु" ॥५॥

षष्ठे—"ओं षड् ऋतुभ्यो विष्णुस्त्वा नयतु" ॥ ६ ॥
सप्तमे—"ओं सखे सप्त पदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु" ॥ ७ ॥ इति सप्तपदाक्रमणम् ।

इस सप्तपदी का भावार्थ यह है कि १ ला पग-अन्न के लिये, २ रा पग-जल के लिये, ३ रा पग-धनवृद्धि के लिये । ४ था पग-आरोग्यता के लिये । ५ वां पग-पशुओं के लिये, ६ ठा पग—ऋतुओं के लिये, ७ वा पग—मेरे अनुकूल रहने वाली-सातो पद वाली विष्णु तुम को चलाते हैं ।

अभिषेकः

अब नीचे मंत्र से वर अपने स्थान पर बैठे और दृढ़ पुरुष के कन्धे का घड़ा मँगाय और आम के पत्ते से अभिषेक करे ।

अथ वरो यथास्थानमागत्य उपविश्य च दृढ़पुरुषस्य स्कन्धस्थितकुम्भमादायाम्र-पल्लवेन जलमानीय तेन जलेन वधूमूर्द्धन्यभिषिञ्चति ।

(आपः शिवा इत्यस्य प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता वधमूर्धाभिषेके विनियोगः)।

"ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्' इति ॥१॥

(आपो हिष्ठेत्यादीनां सिन्धुद्वीप ऋ० गायत्री छं० आपो दे० अभिषेके विनियोगः) ।

"ॐ आपो हिष्ठा मयोभुवस्ता नऽ ऊर्ज्जे दधातन । महे रणाय चक्षसे ॥ २ ॥

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ ३ ॥

ॐ तस्माऽ अरङ्ग-माम वो यस्य क्षयाय जिन्वथ । आपो जनयथा चन+ ॥ ४ ॥

इति चतुर्भिर्मन्त्रैरभिषिञ्चेत् ।

भवार्थ—यह जल अत्यन्त शान्तिदायक-कल्याणकारी औषधस्वरूप है । हमे आरोग्यता दो बल के लिये सहायक हो-जिससे आनन्द हो । कल्याणकारी रस का भागी बनाओ, माताएँ स्तनों का रस बालक को देती हैं जिसके-दर्शन करने को प्रेरित करे वह शुभ हो हमें उत्पादक शक्ति दो ।

—सूर्य (वा) ध्रुवदर्शन—

अथ दिवा विवाहपक्षे "सूर्य्यमुदीक्षस्व" इति वधूं संबोधयति वरः । सा च तच्चक्षुरित्यृचं पठित्वा सूर्यं पश्येत् ।

निम्न मंत्र पढ़ते हुए सूर्य का दर्शन करे और अपनी आयु आरोग्यता की कामना करते हुए नमस्कार करे।

तच्चक्षुरित्यस्य दध्यङ्ङाथर्वण ऋ० ब्राह्मी त्रिष्टुप् छ० सूर्यो दे० सूर्यावेक्षणे वि०)।

ॐ तच्चक्षु र्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ श्रृणुयाम शरदः शतंप्रब्रवाम शरदःशतमदीनाःस्याम शरदः शतं भूयश्च शरद÷शतात् ॥१॥

अस्तङ्गते तु सूर्य्ये ध्रुवमुदीक्षस्वेति प्रैषानन्तरं ध्रुवं पश्यति। तत्र वरपठनीयो मन्त्रः।

ध्रुव का दर्शन भी अपनी अचलता हो बृहस्पति द्वारा प्राप्ति की कमना करे।

(ध्रुवमसीत्यस्य प्रजापतिर्ऋ० त्रिष्टुप्छं० प्रजापतिर्दे० ध्रुवावेक्षणे विनियोगः)।

ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि। मह्यं त्वाऽऽदाद् बृहस्पतिर्मया पत्या प्रजावती सजीव शरदः शतम्। सा यदि न पश्यति तर्हि 'पश्यामि' इति ब्रूयात् ॥२॥

अथ हृदयालम्भनम्

अथ वरो वध्वा दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वा तस्या हृदयमालभते।

(मम व्रते त इत्यस्य प्रजापतिर्ऋ० त्रिष्टुप्छं० प्रजापतिर्दे० वधूहृदयालम्भने वि०)।

ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं तेऽअस्तु ।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥ ३ ॥

अथ वरो वधूमभिमन्त्रयते (सिन्दूर-दान)

सुलङ्गलीरित्यस्य प्रजापतिर्ऋषि अनुष्टुप्छन्दः लिङ्गोक्ता देवतावध्वभिमन्त्रणे विनियोगः) ।
ॐ सुमंगलीरियं वधूरिमा ꣳ समेत पश्यत । सौभाग्यमस्यै दत्वा याथाऽस्तं विपरेत न ।

इति मन्त्रेण बधूं पश्यन् मन्त्रं पठति । अत्र शिष्टाचारात् वरस्य वामभागे वधूम् उपवेशयन्ति । तस्याः सीमन्ते वरः स्त्रियश्च सिन्दूरमपि दापयन्ति । अत्र आचारात्कन्या वाक्यानि पठेत् ।

कन्या-वरयो परस्पर वाक्यबन्धनम् (कन्या वाक्यम्)

तीर्थव्रतोद्यापानदानयज्ञान् मया सह त्वं यदि कान्तः कुर्याः ।
वामांगमायामि तदा त्वदीयं भाषेत वाक्यं प्रथमं कुमारी ॥ १ ॥

तीर्थव्रतोद्यापनदानज्ञान् मया सह त्वं यदि कान्त कुर्याः ।
वामाङ्गमायामि तदा त्वदीयं भाषेत वाक्यं प्रथमं कुमारी ॥ १ ॥

* व्रत, तीर्थ, मख, दानादि में रखिए मुझें संग में सदा । वामांग में आऊँ तभी होवें वचन स्वीकृत यदा ॥१॥

मन्त्रार्थ—हेपति ! तीर्थ, व्रत, उद्यापन, यज्ञ और दानादि के समय मुझे साथ रक्खो, तो मैं आपके बामभाग में आऊँ ॥१॥

हव्यप्रदानैरमरान् पितॄंश्च कव्यप्रदानैर्यदि पूजयेथाः ॥ वामाङ्गमायामि तदा त्वदीयं भाषेत कन्या वचनं द्वितीयम्।२।

यदि हव्य से सुर पितर गणको कव्य से पूजित करो । वामांग में आऊँ तभी ये वचन यदि स्वीकृत करो ॥ २ ॥

मन्त्रार्थ—यदि कव्य से पितरों को और देवताओं को हव्य देकर तृप्त करते रहो तो मैं आप के वामभाग में आऊँ ॥२॥

कुटुम्बरक्षाभरणे यदि त्वं कुर्याः पशूनां परिपालनं च ॥ वामाङ्गमायामि तदा त्वदीयं भाषेत कन्या वचनं तृतीयम् ॥३॥

यदिवंश रक्षण भरण करिए गोमहिष पशुवृन्द से । शोभित रहे शुभतम गृहाङ्गण पा कृपा गोविन्द से ॥ ३ ॥

मन्त्रार्थ—कुटुम्ब की रक्षा भरण और पोषण करो तथा गौ, महिषी, आदि पशुओं को रक्खो और उनका पालन करो, तो मैं आपके वागभाग में आऊँ ॥ ३ ॥

आयव्ययौ धान्यधनादिकानां पृष्ट्वा गृहे चेदुचितं विदध्याः ।
वामाङ्गमायामि तदा त्वीदयं भाषेत कन्या वचनं चतुर्थम् ॥ ४ ॥

यदि आय व्यय धनधान्य में सहमति हमारी आप लें । स्वीकार हो वामांग में तो फिर कुमारी आप लें ॥ ४ ॥

मन्त्रार्थ—धन, धान्य और व्यय आदि मुझसे पूछ कर करो तथा घर में रक्खो, तो मैं आपके वामभाग में आऊँ ॥४॥

देवालयारामतडागकूपवापीर्विदध्या अथ पूजयेथाः ॥ वामाङ्गमायामि तदा त्वदीयं भाषेत सा पञ्चमवाक्यमेतत् ।५।

मन्दिर, बगीचा, कूप, सर वापी बना रखा करें। वामांग में आऊं तभी पञ्चम वचन यो उच्चरें ॥ ५ ॥

मन्त्रार्थ–मन्दिर, बगीचा, तालाब, कूप, बावली इत्यादि बनावो और उनकी रक्षा करो तो मैं आपके वामभाग आऊं ।५।

देशान्तरे वा स्वपुरान्तरे वा यदि प्रकुर्याः क्रयविक्रयौ त्वम् ।
वामाङ्गमायामि तदा वदीयं भाषेत कन्या वचनं च षष्ठम् ॥ ६ ॥

निज देश या परदेश में यदि आप हो व्यवसाय चित। वामांग में आऊँ तभी छठवाँ वचन कन्या कथित ॥ ६ ॥

मन्त्रार्थ–यदि देश अथवा परदेश में क्रय-विक्रय और धनोपार्जन करते रहो, तो मैं आपके वाम भाग में आऊँ ॥ ६ ॥

न सेवनीया परपूर्विका स्यात्त्वया भवोद्भाविनि भामिनीति ।
वामाङ्गमायामि तदा त्वदीयं भाषेत सा सप्तमवाक्यमेतत् ॥ ७ ॥

कितनी प्रबल हो कामना पर दार पर भोगें नहीं। वामांग आने के लिए कन्या वचन अन्तिम यही ॥ ७ ॥

मन्त्रार्थ—अत्यन्त प्रबल कामना होनेपर भी आप परस्त्री का सेवन न करें, तो मैं आपके वामभाग में आऊँ ॥ ७ ॥

अथ वरो ब्रूते (पश्चात् वर वधू से कहे)–

उद्याने सोमपाने च पितुर्गृहगमेऽपि च । मदाज्ञां लङ्घयित्वा तु न गच्छेर्यदि सुन्दरि ॥ १ ॥

मन्त्रार्थ - उद्यान, सोमपान और पिता के घर में भी यदि जाना हो, तो मेरी आज्ञा के नहीं जाना ॥ १ ॥

मदीयचित्तानुगतं च चित्तं सदा मदाज्ञा परिपालनं च ॥ पतिव्रता धर्मपरायणा त्वं कुर्यास्तदा सर्वमिदंप्रपन्नम् ॥२॥

मन्त्रार्थ—यदि तुम मेरी इच्छा के अनुसार अपनी इच्छा सर्वदा रक्खोगी और सदा मेरी आज्ञाका पालन करने में अपना चित्त लगावोगी और पतिव्रताधर्म के पालन में सदा तत्पर रहोगी, तो मैं तुम्हारे उपयुक्त सातों दचनों का अवश्य पालन करूँगा ॥ २ ॥

अथाग्ने प्रागुदग्वा पूर्वंकल्पिते गुप्तागारे (गृहे) आनडुहे रोहिते चर्मणि रक्तवस्त्रे वा कश्चन दृढपुरुषो दृढो वर एव वा वधू-मुत्थाप्य उपवेशयति । (इह गाव इत्यस्य प्रजापतिर्ऋ० अनुष्टुप्छं० लिङ्गोक्ता देवता वधूपवेशने वि०) ।

ॐ इह गावो नि षीदन्त्विहाश्वाऽ इह पूरुषाः । इहो सहस्रदक्षिणो यज्ञऽ इह पूषा निषीदतु ॥ इति मन्त्रेण ।

मन्त्रार्थ—"यहां पर गौएं बैठें, घोड़े, पुरुष, सहस्र दक्षिणावाला यज्ञ और पूषा बैठे ।" ॥

निम्न मंत्र अग्नये स्विष्ट कृते स्वाहा से आहुति दे । इस आहुति को देते समय ब्रह्मा से स्पर्श किये रहे । प्रोक्षणी के घृत का प्राशन, सिरपर मार्जन-सुमित्रियान मंत्र से करे । अग्नि में पवित्री छोड़ दे । कृतैतत० संकल्प से पूर्णपात्र दान करे ।

ॐ स्वस्ति के उच्चारण से ब्रह्मा पूर्णपात्र ग्रहण करे । इसी प्रकार आचार्य को दक्षिणादे । ब्राह्मण को गाय, क्षत्रिय को गांव, वैश्य को अश्व, अन्यों को सुवर्णादि यथा शक्तिदान दे ।—

ततः स्विष्टकृद्धोमः—(अग्नये स्विष्टकृत इत्यस्य वामदेव ऋ० यजुश्छन्दः स्विष्टकृद्देवता स्विष्टकृद्धोमे वि०) "ॐ अग्नये स्विष्टकृते स्वाहा" इदमग्नये स्विष्टकृते न मम । इत्याज्येन

स्विष्टकृद्धोमं विधाय संस्रवं प्राश्य अवघ्राय वा आचम्य पवित्राभ्यां शिरः सम्मृज्य पवित्र प्रतिपत्तिमग्नौ "स्वाहा" इति कृत्वा अग्नेः पश्चिमतः प्रणीताविमोकं कुर्यात्। ब्रह्मग्रन्थि-विमोकः। [ततो बर्हिर्होमस्तूष्णीम्]। तत ब्रह्मणे पूर्णपात्रदानम्—"कृतैतद्विवाहहोमकर्म-प्रतिष्ठार्थमिदं पूर्णपात्रं सदक्षिणाकं प्रजापतिदैवतममुकशर्मणे ब्रह्मणे तुभ्यमहं सम्प्रददे" इति दद्यात्॥ 'ॐ स्वस्ति' इति प्रतिवचनम्। एवमेव आचार्याय दक्षिणां दद्यात्। ब्राह्मणश्चेद् गाम्, क्षत्रियश्चेद् ग्रामम्, वैश्यश्चेदश्वम्, अन्यत्र सुवर्णादिद्रव्यं यथाश्रद्धं यथाशक्ति ब्राह्मणेभ्यो दातुं सङ्कल्प्य दद्यात्। तद्यथा—

अब वधू सहित विवाह कर्म की सिद्धि के लिये भूयसी दक्षिणा नाना नामगोत्र के ब्रह्मणों को, नट-नर्तक-गायक-दीनानाथों को विभज्य कर के दे॥ इसके बाद त्र्यायुषकरण क्रिया करे—बाद में छाया पात्र दान कर तिलक करै—ब्राह्मणों से आशीर्वाद ग्रहण करे। विवाह में पूर्णाहुति न करे।

"अद्येह सवधूकोऽहं विवाहकर्मणः सादगुण्यार्थमिमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो नटनर्तकगायकेभ्यो दीनानाथेभ्यश्च विभज्य दास्ये" इति सङ्कल्प्य (त्र्यायु-

षमित्यस्य नारायणऋषिरुष्णिक् छन्दोऽग्निर्देवता त्र्यायुषकरणे विनियोगः) "ॐ त्र्यायुषं जमदग्नेः" इति ललाटे। "ॐ कश्यपश्य त्र्यायुषम्" इति ग्रीवायाम्। "ॐ यद्देवेषु त्र्यायुषम्" इति दक्षिण-बाहुमूले। "ओं तन्नोऽ अस्तु त्र्यायुषम्" इति हृदि। तत भस्म आहृत्य त्र्यायुषाणि कृत्वा घृते छायां दृष्ट्वा छायापात्रदानं कृत्वा शिष्टाचारप्राप्तं तिलक-करणाक्षतचन्दनं मन्त्रविप्राशीर्वचनं यथाकुलं यथादेशाचारं तत्र तत्र क्रियमाणमनुमन्येरन्। विवाहादिसंस्कारेषु पूर्णाहुतिं न दद्यात्पारस्करगृह्यसूत्रादावनुक्तत्वात्।

('विवाहादि क्रियायां च शालायां वास्तुपूजने। नित्यहोमे वृषोत्सर्गे पूर्णाहुति न कारयेत्॥' इति प्रयोगरत्ने।)

अथ वरवध्वोस्त्रिरात्रनियमाः।

विवाह के आरम्भ से त्रिरात्रि तक क्षार-लवण-तिक्त वस्तुओं का त्याग करे तथा—खाट का त्याग कर भूमिमें ही सोवे तथा संयम का पालन करे।

ततो विवाहादारभ्य त्रिरात्रमक्षारालवणाशिनौ स्यातां जायापती। अधः खट्वारहिते भूभागे आस्तृते शयीयातां त्रिरात्रमेव। संवत्सरं समग्रं मैथुनं नोपेयातां द्वादशरात्रं वा

षड्रात्रं वा त्रिरात्रं वेति। एते विकल्पा मैथुनकरणशक्त्यपेक्षया ज्ञातव्या।

इति सविधि विवाह पद्धति समाप्ता।

अथ चतुर्थीकर्मप्रारम्भः।

विवाह के चौथे दिन घर में ही चतुर्थी कर्म करे—वधू-वर २ पीढ़े पर पूर्वमुख मंगल स्नान करें। आचमन प्राणायाम के साथ आनोभद्रादीन मन्त्रों को पढ़ गणपति पूजन करे—संकल्प कर चतुर्थी कर्म करें। और पंचभू-संस्कार सहित अग्निस्थापन करे।

वरः स्वगृहमागत्य विवाहचतुर्थदिवसे स्व-पत्न्या सह वधूपितृगृहे मलङ्गस्नानं कृत्वा शुभासने उदङ्मुख उपविश्य देशकालौ सङ्कीर्त्य "मम अस्या भार्यायाः सोमगन्धर्वाऽग्न्युपभुक्तत्वदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहैकदेशं चतुर्थीकर्माऽहं करिष्ये" इति संकल्प्य। आनोभद्रादीन् मंगलमन्त्रान् पठेत्। गणेशादिपूजनं कुर्यात्। ततोगृहाऽभ्यन्तरतो होमवेदि सम्पाद्य, होमवेद्यां पञ्चभूसंस्कारं कृत्वा सुवासिन्या आहृतं लोकिकं वैवाहिकमग्निं संस्थाप्य दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाऽऽज्यभागविष्टवाऽऽज्याहुतीर्जुहोति तद्यथा—

(प्रजापतय इति द्वयोर्वामदे० ऋ० यजुश्छन्दः क्रमेण प्रजापतीन्द्रौ देवते होमे वि०)।

ओं प्रजापतये स्वाहा, इदं प्रजापतये न मम ॥ १ ॥ ओं इन्द्राय स्वाहा, इदमिन्द्राय न मम ॥ २ ॥

(अग्नये स्वाहा, सोमाय स्वाहा इति द्वयोर्वामदेव ऋ० यजुश्छन्दः अग्निः सोमः इति क्रमेण देवते होमे वि०)।

ओं अग्नये स्वाहा, इदमग्नये न मम ॥ ३ ॥ ओं सोमाय स्वाहा, इदं सोमाय न मम ॥ ४ ॥

इत्याज्यभागौ जुहुयात्। ततोऽनन्वारब्ध आज्येन प्रधानहोमं कुर्यात्।

(अग्ने प्रायश्चित्त इत्यादीनां पञ्चानां परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता चतुर्थीकर्माङ्गाज्यहोमे वि०)।

ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽ उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये न मम ॥ १ ॥ ओं व्वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽ उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं वायवे न मम ॥ २ ॥ ओं सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽ उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै

नाशय स्वाहा। इदं सूर्याय० ॥ ३ ॥ ओं चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽ उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं चन्द्राय न मम ॥ ४ ॥ ओं गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामऽ उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं गन्धर्वाय न मम ॥ ५ ॥ इति पञ्चाहुतिर्जुहुयात्।

ततः स्थालीपाकेन जुहोति—

(प्रजापतय इति वामदेव ऋ० यजुश्छन्दः प्रजापतिर्दे० चरुहोमे वि०)

ओं प्रजापतये स्वाहा, इदं प्रजापतये न मम।

(अग्नये स्विष्टकृतेइत्यस्य वामदेवऋ० यजुश्छन्दःअग्निःस्विष्टकृद्देवता स्विष्टकृद्होमे वि०)

ओं अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम। तत आज्येन जुहुयात्।

(महाव्याहृतीनां प्रजापतिर्ऋ० यजुश्छं० अग्निवायुसूर्याः क्रमेण देवता होमे वि०)

ओं भूः स्वाहा, इदमग्नये०। ओं भुवःस्वाहा, इदं वायवे०। ओं स्वः स्वाहा, इदं सूर्याय०।

(त्वन्नः सत्वन्नः इत्यनयोर्वामदेव ऋ० त्रिष्टुप्छं० अग्नीवरुणौ देवते होमे वि०)

ओं त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥ १ ॥

ओं स त्वन्नोऽअग्नेऽवमो भवोती नेदिष्ठो ऽअस्याऽउषसो व्व्युष्टौ। अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳसुहवो नऽएधि स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥ २ ॥

(अयाश्चाग्न इत्यस्य वामदेव ऋ० त्रिष्टुप्छं० अग्निर्दे० होमे विनियोगः)

ओं अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽ असि। अया नो यज्ञं वहास्यया नो धेहि भेषजꣳस्वाहा। इदमग्नये न मम ॥ ३ ॥

(ये ते शतमित्यस्य वामदेव ऋ० त्रिष्टुप्छं० वरुणः सविता विष्णुर्विश्वेदेवा देवता होमे वि०)

ओं ये ते शतं ँवरुण ये सहस्रं यज्ञियाः पाशा ँवितता महान्तः । तेभिर्न्नोऽअद्य सवितात विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ४ ॥

(उदुत्तममिति शुनःशेप ऋ० त्रिष्टुप्छन्दो वरुणो देवता होमे वि०)

ओं उदुत्तमं ँवरुण पाशमस्मदवाधमं ँविमध्यमꣳश्रथाय । अथा ँवयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा । इदं वरुणाय न मम ॥ ५ ॥ एताः प्रायश्चित्तसंज्ञकाः ।

(प्रजापतय इत्यस्य वामदेवऋषिर्यजुश्छन्दः प्रजापतिर्देवता होमे विनियोगः ।)

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम । ततो बहिर्होमः । ततः संस्रवप्राशनम् । अग्नौ पवित्रप्रतिपत्तिः । प्रणीताविमोकः पश्चिमतः । ब्रह्मणे पूर्णपात्रदानम् । ब्रह्मग्रन्थि-विमोकं च कृत्वा—

(सुमित्रियेति द्वयोः प्रजापतिर्ऋ० यजुश्छ० आपो देवता मार्जनप्रणीतान्युञ्जीकरणयोर्वि०)।

"ॐ सुमित्रियानऽ आपऽ ओषधयः सन्तु" इति पवित्राभ्यां शिरसि जलं मार्जयित्वा, "ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः" इत्यग्नेः पश्चात् प्रणीतान्युञ्जीकरणं च कुर्यात्।

तत आम्रपल्लवेन एनां मूर्ध्नि अभिषिञ्चति वरः।

(या त इत्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः वधूर्देवता अभिषेचने विनियोगः)।

ॐ या ते पतिघ्नी प्रजाघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं ततऽ एनां करोमि सा जीर्यं त्वं मया सह श्री अमुकि देवि ॥ १ ॥ इति मन्त्रेण। ततो वरः स्थालीपाकं वधूं प्राशयति।

(प्राणैस्त इत्यस्य प्रजापतिर्ऋ० यजुश्छन्दो वधूर्देवता वध्वाः स्थालीपाकप्राशने वि नियोग)।

"ॐ प्राणैस्ते प्राणान्त्सन्दधाम्यस्थिभिरस्थीनि मा ꣳसैर्मा ꣳसानि त्वचा त्वचम् ।" इति मन्त्रेण । मन्त्रान्तेऽन्नं सकृत् प्राशयेत् । ततो वधूहृदयं स्पृष्ट्वा वरः पठेत् ।

(यत्त इत्यस्य प्रजापतिर्ऋ० अनुष्टुप्छन्दः वधूर्देवता हृदयालम्भने विनियोगः) ।

ओं यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शत ꣳ शृणुयाम शरदः शतम् ॥ इति ॥ ३ ॥

तत आचार्यं दक्षिणां दत्त्वा, ब्राह्मणेभ्यो भोजनसङ्कल्प्य भूयसीं दत्त्वा तैराशीर्वादान् गृह्णीयात् ।
ततः श्राद्ध-पर्वदिनानि वर्जयित्वा ऋतुकालोभिगमनं कुर्यात् यथाकामी वा भवेत् ।

॥ काशीनाथशर्म्मगौड़कृता सविधि-चतुर्थी कर्मसहिता विवाहपद्धति समाप्ताः ॥

—: ० :—

कालिदासोक्त शाखोच्चरमंगलाष्टकानि ॥

श्रीमत्पङ्कजविष्टरो हरिहरौ वायुर्महेन्द्रोऽनलश्चंद्रो भास्करवित्तपालवरुणाः प्रेताधिपादिग्रहाः ।
प्रद्युम्नो नल-कूबरः सुरगजश्चिन्तामणिः कौस्तुभः स्वामी शक्तिधरश्च लाङ्गलधरः कुर्वन्तु नो मंगलम् ॥ १ ॥
गंगा गोमतिगोपतिर्गणपतिर्गोविन्दगोवर्द्धनो गीता गोमयगौरिजो गिरिसुता गंगाधरो गौतमः ।
गायत्री गरुडो गदाधर गया गम्भीरगोदावरी गन्धर्वग्रहगोपगोकुलगणाः कुर्वन्तु नो मगलम् ॥ २ ॥
नेत्राणां त्रितयं शिव पशुपतेरग्नित्रयं पावनं पुण्यं विष्णुपदत्रयं त्रिभुवनं ख्यातं च रामत्रयम् ।
गगावाहपथत्रयं सुविमलं देवत्रयं ब्राह्मण सन्ध्यानां त्रितयं द्विजैः सुविहितं कुर्वन्तु नो मगलम् ॥ ३ ॥
गौरी श्रीः कुलदेवता च सुभगा भूमि-प्रपूर्णा शुभा सावित्री च सरस्वती सुर नदी सत्यव्रतारुन्धती ।
सत्या जाम्बवती च रुक्मभगिनी दु स्वप्नविध्वंसिनी वेला चाम्बुनिधः सुमीनमकराः कुर्वन्तु नो मगलम् ॥ ४ ॥
अश्वत्थो वटवृक्षचन्दनतरुमन्दारकल्पद्रुमौ जम्बूनिम्बकदम्बचूतसरला वृक्षाश्च ये क्षीरिणः ।
सर्वे ते फलसंयुताः प्रतिदिनं विभ्राजनं राजते रम्यं चैत्ररथं च नन्दनवन कुर्वन्तु नो मंगलम् ॥ ५ ॥
वाल्मीकिः सनकः सनन्दनतरुर्व्यासो वसिष्ठो भृगुर्जावालिजमदग्निकच्छजनको गर्गोऽङ्गिरा गौतमः ।
मान्धाता भरतो नृपश्च सगरो धन्यो दिलीपो नलः पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु नो मंगलम् ॥ ६ ॥
लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा गावः कामदुधा सुरेश्वरगजो रम्भादिदेवांगनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः शङ्खो विषं चाम्बुधे रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु नो मगलम् ॥ ७ ॥
गंगा-सिन्धु-सरस्वती च यमुना गोदावरी नर्मदा कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गण्डकी पूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वन्तु नो मंगलम् ॥ ८ ॥

इति शाखोच्चारमङ्गलाष्टकानि ।

गोत्र प्रवर की जानकारी की बातें

गोत्र—ऋषियों की उत्पन्न सन्तान ही अब तक उनके नाम के गोत्र से ही जानी जाती है।

वेद—ईश्वर प्रदत्त ये चार वेद हैं जो अपौरुषेय कहे जाते हैं—ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद हैं। इनके ऋषियों के भेद से ही गोत्र-प्रवर वाले अपने-अपने वेद का अध्ययन करते हैं।

उपवेद—वेद के अन्तरंग एक अंग को ही कहते हैं।

शाखा— उसी वेद के ज्ञान के कारण-ऋषियों की उत्पत्ति तथा प्रसिद्धि के समय को ही लगभग शाखा कहा जाता है।

सूत्र—प्रत्येक ऋषियों ने जिन-जिन वेदों के अन्तर्गत वे थे उनको सर्व साधारण की ज्ञान की वृद्धि जानकारी के लिये सूत्रों की रचना की जिससे-अपने-अपने जातीय कर्म का पूरा-पूरा विवरण प्राप्त होता है।

प्रवर—प्रत्येक ऋषियों के मंडल से ही प्रवर बना है—इनकी ग्रंथियाँ विशेषकर यज्ञोपवीत में मिलती हैं तथा—विवाहादि संस्कारों में अपने गोत्र, वेद—शाखा—प्रवर का उच्चारण कर ही अपने वंश का परिचय दिया जाता है।

शिखा—प्रत्येक गृहस्थी जो अपने शिर पर शिखा रखते हैं उसी का ज्ञान वेद—शाखा से दक्षिण-और वाम ओर का होता है उसी प्रकार मध्य शिर के केन्द्र से दक्षिण तथा वाम भाग में शिखा होती है।

पाद— इसका भी ज्ञान शिखा की ही भांति होता है। यह भी दक्षिण तथा वाम पाद यज्ञ-पूजन-गृहप्रवेश-पाद प्रक्षालनों में अपने-अपने पाद के अनुसार ही प्रथम धुलाना-पूजन कराना-प्रवेश में रखना चाहिये।

देवता— वेद के जो देव हैं उन्हीं के अनुसार हमारे देव कहे गये हैं। ऋग्वेद के ब्रह्मा, यजुर्वेद के शिव, सामवेद के विष्णु तथा अथर्व वेद के इन्द्र देवता हैं।

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
कश्यप	सामवेद	गांधर्व	कौथुमी	गोभिल	कश्यप, असित, देवल,	वाम,	वाम,	विष्णु,
कश्यप					कश्यप, आवत्सार, नैध्रुव,			
कश्यपाः					कश्यपा, वत्स, रणेकध्रुव,			
काश्यपेयाः					काश्यपेय, कुशिक, कौशिक, काश्पेया			
शांडिल्य					शांडिल्य, असित, देवल,			
शांडिल्य					शांडिल्य, काल्य, वाल्मीक,			
वत्स					भार्गव, च्यवन, आप्लवान,			
वात्स					वत्स, च्यवन, आप्जवान, द्रुमदा,			
वात्स					भार्गव, च्यवन, आप्लवान, जामदग्न्य, और्व,			
धनञ्जय					विश्वामित्र, माधुच्छन्चस, धनंजय			
कृष्णाजिन					विश्वामित्र, च्यवन, जमदग्नि, कृष्णाजिन,			
मुद्गल					मुद्गल, भार्गव, च्यवन, आप्लवान, जमदग्नि			
चांद्रायण					चन्द्रायन, कृत्य, वत्स,			
चामनदेव					चामन, मध्याम, मौनस,			
सांकृत्यायन					सांकृत्यायन, सांख्या, गौरव,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
गोभिल					गोभिल, आंगिरस, देष्ण			
मौनस					मौनस, भार्गव, वातहव्य सांचा,			
वाछिल					वाच्छिल, यजन, ब्रद्धा,			
मौंगिल					मौगिल, भार्गव, सादित्य,			
भार्गव					वत्स, भार्गव, च्यवन, आप्लवान, और्व,			
भार्गव					भार्गव, च्यवन, आप्लवान, नार्थ,			
वाच्छिल					वाछिल, च्यवन, मौनस, लौर्म्य,			
दाल					जमदग्नि, खिल कुशिक, कौशिक, काश्यप,			
सम्भव					सम्भव, अनुरुक्त, देवल, असित, वामन,			
पूर्ण	ऋग्वेद	अथर्व	आश्वलायन	आश्वलायन	विश्वामित्र, देवरात्र, पूर्ण,	वाम	वाम	ब्रह्मा,
बौद्धायन	ऋग्वेद	अथर्व	आश्वलायन	आश्वलायन	पुल० बोधा० त्रेयव० शिच्य पार्वातिय,	बाम,	बाम,	ब्रह्मा,
भरद्वाज	यजुर्वेद	धनुर्वेद	माध्यंदिनी	कात्यायन	आंगिरस, बार्हस्पत्य, भरद्वाज,	दक्षिण	दक्षिण	शिव
उपमन्यु					भार्गव वशिष्ठ, उपमन्यु,			
उपमन्यु					उपमन्यु, वशिष्ठ, अभ्रवत्सु,			
कात्यायन					विश्वामित्र, वशिष्ठ, किल,			
सांकृत					सांकृत, सांख्यायन, किल,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
गर्ग	यजुर्वेद	धनुर्वेद	माध्ये०	कात्या०	आंगिरस; सैन्य; गार्ग,	दक्षिण	दक्षिण	शिव,
गौतम					आंगिरस, वार्हस्पत्य, भारद्वाज,			
पराशर					पाराशर, वशिष्ठ, सांकृत,			
कौशिक					विश्वामित्र, अघमर्षण, कौशिक,			
कौशल्य					विश्वामित्र, अघमर्षण, मधुच्छन्दस,			
भार्गव					वाशिष्ठ, इन्द्रप्रमदा, भारद्वाजासित,			
वशिष्ठ					अत्रेय, आर्चनानस, श्यावाश्व,			
कृष्णात्रि					कृष्णात्रि ,, ,,			
अत्रि					अत्रि, आर्चनानस, श्यावाश्व			
अत्रि					आत्रेय, आर्चमानसु, श्यावाश्व,			
कौडिन्य					वाशिष्ठ, कौडिल्य, मित्रावरुण,			
कपि					आंगिरस, अमोह्य, वारुक्ष,			
विष्णुवर्द्धन					आंगिरस, पौरु, कुत्सात्रसदस्य,			
नितुन्दन					आंगिरस, ,, ,,			
वाभ्रव्य					विश्वामित्र, अबदल, वाभ्रव्य,			
गौतम					आंगिरस, वार्हस्पत्य, भारद्वाज, गौतम, अत्रि,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
मौनस	यजुर्वेद	धनुर्वेद	माध्यदिनि	कात्यायन	मौनस्य, मार्गव, वेधस,	दक्षिण,	दक्षिण,	शिव,
मुद्गल					आंगिरस, आभ्यश्वा, मौदगल्य,			
मिहरस					कुशिक, क्वोशिक, काश, काश्प, काश्यपेय,			
सावर्ण्य					सावर्ण्य, पुलस्त्य, पुलह,			
अमिल					अमिल, वाशिलु, कौशिक;			
वासिल					वाशिल, अत्रि, अर्चिस,			
शौनक					शौनक, शौव, भावन,			
चांद्रायण					चांद्रायण, वात्स, वत्स,			
वामदेव					वामदेव, माध्यायन, गौतम,			
मांडव्य					मांडव्य, मांडकेय, विश्वामित्र,			
दालभ्य					दालभ्य, आंगिरस, बार्हस्पत्य,			
गांगेय					गांगेय, गर्ग, सांख्यालित,			
सिंहल					वाशिल, धरणीषु, सारस्वत,			
मौकल्य					मौकल्य, आंगिरस, बार्हस्पत्य,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
वैहल	यजुर्वेद	धनुर्वेद	माध्ये०	कात्यायन	वैहल, असित, बहल,	दक्षिण,	दक्षिण,	शिव,
देवरात					देवरात, वैष्ण, रैस्त,			
यस्क					भार्गव, वैनहव्य, शावेतश,			
मित्रयुव					भार्गव, वाघ्रपतयस्य, दिवदस,			
विद					भार्गव, और्व, जामदग्न्य,			
वैन्य					भार्गव, वैन्य, पार्थ,			
आयास्य					आंगिरस, आयास्व, गौतम,			
शारद्वत्त					आंगिरस, गौतम, शारद्वन्त,			
जातुकर्ण					अत्रि, वाशिष्ठ, जातुकर्ण,			
कौशिक					कौशिक, विश्वामित्र, कौशिल,			
यदभू					यदभु, विश्वामित्र, देवरात,			
पराशर					गस्त्या, पौर्णमास, पराशर,			
मित्रावरुण					त्रेय, पराशर, शुकभा,			
जावहिऋषि					जावहिश्रुति, तथा, तथा,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
दर्भ	यजुर्वेद	धनुर्वेद	माध्यन्दिनी	कात्यायन	आंगिरस, बार्हस्पति, च्यवन,	दक्षिण	दक्षिण	शिव,
उदवारन					आंगिरस, गौतमी, श्रमान,			
सत्यवती					अगस्त, चित्त, सत्ववतीत,			
पाराशर					भार्गव, दनच्य, गुणित,			
ऐरबम्मंजन					शिल, च्यशिलय, कौशिला,			
शौनक					शौनक, अंगिरस, नमादा,			
गौतम					गौतम, आङ्गिरस, तिथ्य,			
उतथ्य					आङ्गिरस, गौतम, शारद्वत्त			
ऊतथ्य					आङ्गिरसउतथ्य, दीर्घतामस			
औतथ्य					आङ्गिरसउतथ्य, काक्षीवत, गौतम, कौमण्ड,			
श्रौतथ्य					आङ्गिरसउतथ्य, काक्षीवव, गौतम, दीर्घतामस,			
औतथ्य					आङ्गिरसउतथ्य, शौतम,			
कात्यायन					कात्यायन अच्छिल, विश्वामित्र,			
हरिकर्ण					हरिकर्ण, तन्न, धात्रय,			
गालव					गालव, यज्ञ, तपहारी, तोपकल्या,			
दालभ्य					दालभ्य, योया, देवदशा,			
गर्ग					गर्ग, गार्गेय, मलि, कर्सामुना,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
देवदत्त	यजुर्वे	धनुर्वेद	माध्यंदिनी	कात्यायन	देवदत्त, विष्णु, खते	दक्षिण	दक्षिण	शिव
गार्गेय					गार्गेय, गर्ग, शंखलिखित,			
आक्षकर्ण					वक, सावकन, सत्यायिका,			
बासिल					वाशिल, धारणीक, सारेवत,			
कण्व					कण्वगय, वोदास, मान,			
मौगिला					मौगिला, आङ्गिरस, वार्हस्पत्य,			
वृद्धविष्णु					वृद्धविष्णु, पैष्यत, शुद्धत्तशय,			
कौत्स					कौत्स, अङ्गिरस, यौवनाश्व,			
अष्टाचक्र					बाहल, खरुल, कण्व बिकस वबीयत,			
कुशिक					कुशिक, बिहकस्य, स्वेतप,			
लोहिकाक्ष					लोहिकाक्ष, वैतहव्य, विष्णाव,			
कपिल					कपिल; ओदर देवराज,			
धौम्र					धौम्र, कप्सिष, अत्रिसर,			
चन्द्रगर्ग					चन्दगर्ग, आङ्गिरस, अत्र सुप्रभउदयत,			
आंगिरस					आङ्गिरस, भारद्वाज, दार्हस्पत,			
बार्हस्पत					आङ्गिरस, बार्हस्पत, भारद्वाज,			
सावर्ण					लोमस, अमद्र, सावर्ण,			
मरीच					कात्यायन; वाशिष्ठ, मरीच,			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
	यजुर्वेद	धनुर्वेद	माध्यदिनि	कात्यायन		दक्षिण	दक्षिण	शिव,
माध्रुवछन्दस किल					धनंय, विश्वामित्र, माध्रु व छान्दस, शांकृत, शांख्यायान, किल,			
शांख्यायन एकावशिष्ठ अघमर्षण					शांकृत, किल, शांखयायान, वशिष्ठ, यमदग्न, एकावशिष्ठ, कौशिक देवराज, अघमर्षण,			
विश्वामित्र याज्ञवल्क्य अगस्त ऐन्द्र					कात्यायन, वशिष्ठ, विश्वामित्र, वशिष्ठ, लोमस, याज्ञवल्क्य, पुलस्त, वशिष्ठ, ऐन्द्र, और्व, अगस्त, अत्रि, अङ्गिरस, ऐन्द्र,			
अमद्र इन्द्रोदय इन्द्रप्रमद बनहव्य					लोमस, सावर्ण, अमद्र, कौडिन्य, भार्गव, इन्द्रोदय, अत्यवान, बैतहव्य, इन्द्रप्रमद, आप्लवान, इन्द्रप्रमद, बैनहव्य,			
कौलब देवल शौनकेत ध्रुवनैन बामदेव					माधुच्छन्दस श्विामित्र, कौलव, वाशिल, शौनकेत, देवल, वासिल, देवल, शौनकेत, कौलव, वामदेव, ध्रुवनैन; ध्रुवनैन, कौलव, बामदेव;			

गोत्र	वेद	उपवेद	शाखा	सूत्र	प्रवर	शिखा	पाद	देवता
गौरव	यजुर्वेद	धनुर्वेद	गांध्यादिना	कात्यायन	आभद्र, कौलव, गौरव,	दक्षिण,	दक्षिण,	शिव,
पुलस्त					मावस, मरीच, पुलस्त,			
भद्रशौल					वासिल, भारद्वाज, भद्रशील,			
भागीरस्य					ध्रुवनैन, इन्द्रोदय, भागीरस्य,			
मैत्रेतृण					मित्रावरुण, पाराशर, मैत्रेतृण,			
लोमस					मरीच, पुलस्त, लोमस,			
सप्तसार					अघमर्षण, नितुन्द, सप्तसार,			
माध्रुवछादस					लोहित, सिहल, मधुच्छादस,			
भारद्वाज					अङ्गिरस, वार्हस्पत्य, भारद्वाज,			
असित	सामदेव		गांधर्व	कौथुमी	वासिल, कौशल्य, असित,	बाम	बाम	विष्णु
च्यवन					और्व, यमदग्न, वत्स, अप्लवान, च्यवन,			
आप्लवान्					वत्स, यमदग्न, च्यवन, अप्लवान,			
नैध्रुव					काश्यप, कौशिक, अवत्सार,			
लोहित					नैध्रुव काश्यप, लोहित, कौशिक, आवत्सार,			
और्व					वत्स, च्यवन, और्व यमदग्न, आप्लवान,			
अल्पवान					यमदग्न, च्यवन, आप्लवान,			
अम्बसार					विश्वामित्र, भार्गव, अम्बसार,			
बाल्मीक					यास्क, यज्ञ, बाल, बाल्मीक,			
यमदग्न					भार्गवन, च्यव, आप्लवान, और्व, यमदग्न,			

—: ० :—